द्वितीयस्कंध

चिंतां म कृत सिध्यर्थमुपोद्घातं विदुर्बुधाः॥ प्रतिपाद्यमर्थं तु ख्यात्वा संगत्स्यतदर्थमर्थांतरवर्णनमुपोद्घातः ४

भा॰ द्वि॰ १ ॐ नमः श्रीगणेशाय नमः॥ श्रीगुरुभ्यो नमः॥ द्वितीये तु दशाध्याये श्रीभागवतमादितः॥ उद्देशलक्षणोक्तिभ्यां संक्षेपेणोपवर्ण्यते॥१॥ तत्र तु प्रथमेऽध्याये कीर्तनश्रवणादिभिः॥ स्थविरे भगवद्रूपे मनसो धारणोच्यते॥२॥ यन्नामकीर्तनं दानतपोयोगादिसत्फलं॥ तं नित्यपरमानंदं हरिं नरनमस्मर॥३॥ अथ द्वितीयस्कंधव्याख्या उक्तः पूर्वमुपोद्घातः सप्तसंगः शुकागमः॥ राज्ञा पृष्टेन तेनाऽत्र त्वमथाह स्म शुकसन्मुनिः॥४॥ राज्ञः प्रश्नमभिनंदति॥ वरीयानिति॥ त्वया पुंसां श्रोतव्यादिषु मध्ये यः परः प्रश्नः कृत एष वरीयान्॥ यतो लोकहितमेतत्॥ अध्ययगोचर॰ ५

मुमुक्षूणां २

ॐ नमो भगवते श्रीवासुदेवाय॥ श्रीशुक उवाच॥ वरीयानेष ते प्रश्नः कृतो लोकहितं नृप॥ आत्मवित्संमतः पुंसां श्रोतव्यादिषु यः परः॥१॥ श्रोतव्यादीनि राजेंद्र नृणां संति सहस्रशः॥ अपश्यतामात्मतत्वं गृहेषु गृहमेधिनां॥२॥ निद्रया ह्रियते नक्तं व्यवायेन च वा वयः॥ दिवा चार्थेहया राजन्कुटुंबभरणेन वा॥३॥

मोक्षहेतुत्वात्॥ आत्मविदां मुक्तानां च संमतो यतः॥१॥ तत्र तावत्स्वाभाविकक्रियाणामनर्थहेतुत्वं वदन्नेव हियद्वा विपर्ययमित्यस्योत्तरमाह॥ श्रोतव्यादीनीति त्रिभिः॥ गृहेषु सक्तानां॥ अत एव गृहमेधिनां तत्र तत्पंचसूनापराणां॥ मेधति हिंसार्थः॥२॥ तेष्वव्यये वायुर्व्ययो भवतीत्याह॥ नक्तं रात्रौ यत्तद्वयः आयुः तन्निद्रया व्यवायेन रत्या वा ह्रियते॥ दिवा अह्नि यत्तद्वयः तत्तदर्थेहया अर्थार्थमुद्यमेन सिद्धेर्थे कुटुंबपोषणेन वा॥ चकारावनुक्तसमुच्चयार्थौ॥३॥ रामरामरामराम गृहमेधिनः २ राम॰ १

भा॰द्वि॰
२

किमिदमपूर्वंकथयसि॥सत्यं॥अत्यपूर्वमेवेदमित्याहइदंभागवत्मोक्तं॥तन्नामैकप्रधानंपुराणं॥ब्रह्मसंमितं
सर्ववेदतुल्यंपद्यं॥ब्रह्मसम्मितंमितंयेनकृतस्त्वयाप्राप्तमतआह॥अधीतवानिति॥८॥सिद्धस्यतत्वकृता
ध्ययनेप्रवृत्तिः॥तत्राह॥परिनिष्ठितोपीति॥गृहीतचेताः॥आकृष्टचित्तः॥९॥महापुरुषोविष्णुःतदीयःयः
स्यपस्मिन्श्रद्धांकुर्वतांसतीश्रद्धेत्युक्तौ॥१०॥साधकानांसिद्धानांचनातःपरमन्यत्श्रेयोस्तीत्याह॥एतदिति

द्वापरआदिर्यस्यतस्मिन्कलावित्यर्थः १

रअराजेनव्रमाराण्य निरुद्रमिति १

इदंभागवतंनामपुराणंब्रह्मसंमितं॥अधीतवान्द्वापरादौपितुर्द्वैपायनादहं॥८॥परिनिष्ठि
तोपिनैर्गुण्यउत्तमश्लोकलीलया॥गृहीतचेताराजर्षेआख्यानंयदधीतवान्॥९॥तदहंते
भिधास्यामिमहापौरुषिकोभवान्॥यस्यश्रद्दधतामाशुस्यान्मुकुंदेमतिःसती॥१०॥एतन्नि
र्विद्यमानानामिछतामकुतोभयं॥योगिनांनृपनिर्णीतंहरेर्नामानुकीर्त्तनं॥११॥किंप्रमत्त
स्यबहुभिःपरोक्षैर्हायनैरिह॥वरंमुहूर्त्तंविदितंघटतेश्रेयसेयतः॥१२॥ ॥ ॥

ग्रहंतानमनात्यका भाग्वृहज्ञाहंभितिभ वयन्त २

2

इच्छतांकामिनांतत्तत्फलसाधनमेतदेव॥निर्विद्यमानानांमुमुक्षूणांमोक्षसाधनमेतदेव॥योगिनांज्ञा
निनांफलंचैतदेवनिर्णीतं॥नात्रप्रमाणंवक्तव्यमित्यर्थः॥११॥अल्पमेवायुरवशिष्टंकिमहंसाधये
यमितिमाशुचइत्याह॥किमितित्रिभिः॥परोक्षैरलक्षितैर्हायनैर्वर्षैः॥विदितं॥वृथायातीतिज्ञातं॥
यतोयेनज्ञानेनघटेतयत्नंकरोति॥१२॥

राम॰
२

ननु नश्वरकुटुंबवार्धक्ये कथमात्मपुर्व्यपं कुर्यात् ॥ तत्राह देहादिषु आत्मनः सैन्येषु परिकरेषु असत्सु मिथ्याभूते
ष्वपि प्रमत्तः प्रसक्तः तेषां पित्रादीनां नाशं पश्यन्नपि नानुसंधत्ते ॥४॥ एवं विपर्ययप्रश्नस्योत्तरमुक्त्वा
श्रोतव्यादिप्रश्नस्योत्तरमाह ॥ तस्मादिति हे भारत भरतस्य वंश्य सर्वात्मेति श्रेष्ठत्वमाह ॥ भगवानिति सौ

देहापत्यकलत्रादिष्वात्मसैन्येष्वसत्स्वपि ॥ तेषां प्रमत्तो निधनं पश्यन्नपि न पश्यति ॥४॥ तस्माद्भा
भ रत सर्वात्मा भगवान् हरिरीश्वरः ॥ श्रोतव्यः कीर्तितव्यश्च स्मर्तव्यश्चेच्छताभयं ॥५॥ एतावान्सां — यस्मात्तस्मा विकक्रियाः र्थंबताः
ख्ययोगाभ्यां स्वधर्मपरिनिष्ठया ॥ जन्मलाभः परः पुंसामंते नारायणस्मृतिः ॥६॥ प्रायेण मु
नयो राजन्निवृत्ता विधिषेधतः ॥ नैर्गुण्यस्था रमंते स्म गुणानुकथने हरेः ॥७॥ ॥
नि

भक्तिविषयउत्तां॥ दर्थं ॥ ईश्वर इत्यावश्यकत्वं ॥ हरिरिति ॥ बंधहारित्वं ॥ अभयं मोक्षमिच्छता ॥५॥ अतः परमन्यच्छ्रेयो नास्ती
त्याह ॥ एतावानेव जन्मनो लाभः फलं ॥ तमाह ॥ नारायणस्मृतिरिति ॥ सांख्यादिभिः साध्य इति ॥ तेषां स्व
तंत्रलाभत्वं वारयति ॥ सांख्यमात्मानात्मविवेकः ॥ योगोष्टांगः ॥ अंते तु स्मृतिः परो लाभः ॥ न तन्महिमा व
तुं शक्य इत्यर्थः ॥६॥ तत्र सदाचारं प्रमाणयति ॥ प्रायेणेति ॥ विधिषेधतः विधिनिषेधाभ्यां निवृत्ताः नैर्गुण्ये ब्र
नि

वशीकुर्यात् २

भा॰ द्वि॰ जपगर्भंप्राणायाममेववक्तुंजपमाह ॥ त्रिवृत्त्रिभिरकारादिभिर्वर्णैस्तंग्रथितं ॥ ब्रह्माक्षरंप्रणवं ॥ मनसाभ्य
३ सेत् आवर्त्तयेत् ॥ मनस्ताइंद्रियप्रत्याहारंवक्तुंप्राणायामेनमनोनियमनमाह ॥ मनोयच्छेत् ॥ ब्रह्मबीजंप्रण
वमविस्मरन्नेवजितश्वासःसन् ॥१७॥ प्रत्याहारमाह ॥ नियच्छेत् ॥ अक्षानइंद्रियाणिनिश्चयात्मिका

ब्रह्माभिव्यंजकं १

अभ्यसेन्मनसाशुद्धंत्रिवद्ब्रह्माक्षरंपरं ॥ मनोयच्छेज्जितश्वासोब्रह्मबीजमविस्मरन् ॥१७॥
नियच्छेद्विषयेभ्योक्षान्मनसाबुद्धिसारथिः ॥ मनःकर्म्मभिराक्षिप्तंशुभार्थेधारयेद्धिया ॥१८॥
3 तत्रैकावयवंध्यायेदव्युच्छिन्नेनचेतसा ॥ मनोनिर्विषयंयुक्त्वाततःकिंचननस्मरेत् ॥१९॥

बुद्धिःसारथिर्यस्यसः ॥ धारणामाह ॥ मनइतिपुनश्चकर्मभिःतद्वासनाभिराक्षिप्तंआकृष्टंशुभार्थेभगवद्रू
पे ॥१८॥ ध्यानमाहतत्रेति ॥ एकमेकंपादाद्यवयवं ॥ अव्युच्छिन्नेनसमस्तरूपादविच्युतेन ॥ आश्रयवि
शेषेसामान्यतश्चित्तस्थिरीकरणंधारणा ॥ प्रत्यवयवविभावनयातद्दार्ढ्यंध्यानमितिभेदः ॥ समाधिमा राम॰
ह निर्विषयंमनोयुक्त्वासमाधायस्थिरीभूतेमनसिस्फुरत्परमानंदमात्राकारंकृत्वेत्यर्थः ॥१९॥ ३

निरतिशयानंदावाप्तिःफलं२

ननुनश्वरकुटुंबार्थंकथमायुर्व्ययंकुर्यात् ॥ तत्राहदेहादिषुआत्मनःसैन्येषुपरिकरेषुअसत्सुमिथ्याभूते
ष्वपिप्रमत्तःप्रसक्तःतेषांपित्रादिदृष्टांतेननाशंपश्यन्नपिनानुसंधत्ते ॥४॥ एवंविपर्ययप्रश्नस्योत्तरमुक्त्वा
श्रोतव्यादिप्रश्नस्योत्तरमाह ॥ तस्मादितिहेभारतभरतवंश्य सर्वात्मेतिश्रेयस्त्वमाह ॥ भगवानितिसो

देहापत्यकलत्रादिष्वात्मसैन्येष्वसत्स्वपि ॥ तेषांप्रमत्तोनिधनंपश्यन्नपिनपश्यति ॥४॥ तस्माद्भा
भ रतसर्वात्माभगवान्हरिरीश्वरः ॥ श्रोतव्यःकीर्तितव्यश्चस्मर्तव्यश्चेच्छताभयं ॥५॥ एतावान्सां | यस्मात्तस्मा
ख्ययोगाभ्यांस्वधर्मपरिनिष्ठया ॥ जन्मलाभःपरःपुंसामंतेनारायणस्मृतिः ॥६॥ प्रायेणमु | विकल्पिता
नयोराजन्निवृत्ताविधिषेधतः ॥ नैर्गुण्यस्थारमंतेस्मगुणानुकथनेहरेः ॥७॥ ॥
नि

भक्तिविषयउक्तः१ दर्थं ॥ ईश्वरइत्यावश्यकत्वं ॥ हरिरितिबंधहारित्वं ॥ अभयंमोक्षमिच्छता ॥५॥ अतःपरमन्यच्छ्रेयोनास्ती
त्याह ॥ एतावानेवजन्मनोलाभःफलं ॥ तमाह ॥ नारायणस्मृतिरिति ॥ सांख्यादिभिःसाध्यइति ॥ तेषांस्वा
तंत्र्यलाभत्वंवारयति ॥ सांख्यमात्मानात्मविवेकः ॥ योगोष्टांगः ॥ अंतेतुस्मृतिःपरोलाभः ॥ नतन्महिमाव
क्तुंशक्यइत्यर्थः ॥६॥ तत्रसदाचारंप्रमाणयति ॥ प्रायेणेति ॥ विधिषेधतःविधिनिषेधाभ्यांनिवृत्ताःनैर्गुण्ये
नि

वशीकुर्यात् २

भा० द्वि० जपगर्भप्राणायामं च वक्तुं जप्यमाह ॥ त्रिवृत् त्रिभिरकारादिभिर्वर्णैर्ग्रथितं ब्रह्माक्षरं प्रणवं ॥ मनसाभ्य
३ सेत् आवर्तयेत् ॥ मनसा इंद्रियप्रत्याहारं वक्तुं प्राणायामेन मनोनियमनमाह ॥ मनो यच्छेत् ब्रह्मबीजं प्रण
वमविस्मरन्नेव जितश्वासः सन् ॥१७॥ प्रत्याहारमाह ॥ नियच्छेत् ॥ अक्षान् इंद्रियाणि निश्चयात्मिका

अस्याभिव्यंजकं १

अभ्यसेन्मनसा शुद्धं त्रिवृद्ब्रह्माक्षरं परं ॥ मनो यच्छेज्जितश्वासो ब्रह्मबीजमविस्मरन् ॥१७॥
नियच्छेद्विषयेभ्योऽक्षान्मनसा बुद्धिसारथिः ॥ मनः कर्मभिराक्षिप्तं शुभार्थे धारयेद्धिया ॥१८॥
३ तत्रैकावयवं ध्यायेदव्युच्छिन्नेन चेतसा ॥ मनो निर्विषयं युक्त्वा ततः किंचन न स्मरेत् ॥१९॥

बुद्धिः सारथिर्यस्य सः ॥ धारणामाह ॥ मन इति पुनश्च कर्मभिः तद्वासनाभिराक्षिप्तं आकृष्टं शुभार्थे भगवद्रू
पे ॥१८॥ ध्यानमाह तत्रेति ॥ एकमेकं पादाद्यवयवं ॥ अव्युच्छिन्नेन समग्ररूपादवियुक्तेन ॥ आश्रयवि
शेषे सामान्यतश्चित्तस्थिरीकरणं धारणा ॥ अवयवविभावनया तद्दार्ढ्यं ध्यानमिति भेदः ॥ समाधिमा राम०
ह निर्विषयं मनो युक्त्वा समाधाय स्थिरीभूते मनसि स्फुरत्परमानंदमात्राकारं कृत्वेत्यर्थः ॥१९॥ ३

खट्वांगोहिदेवपक्षेस्थित्वादैत्यानजयत्।ततःप्रसन्नैर्देवैर्वरंवृणीष्वेत्युक्तोऽतस्तेनोक्तंप्रथमंतावन्ममायुःकि
यत्तामितितैर्नादेवैरुक्तंतन्मुहूर्त्तमात्रमस्तीति।ततोऽतिशीघ्रंविमानेनभुवमागत्यहरिंशरणंगतइति
पत्रइयंस्वर्गभूमीरजोधिकाकर्मभूमिःपृथ्वी॥१३॥तवतुएतर्ह्यपिइदानीमपितावदितितावताकालेनसां
परायिकंपारलौकिकंसाधनंसंपादय॥१४॥तत्रवैराग्यंतावदाह॥अंतकालइति॥गतसाध्वसःमृत्युभय

भगवत्कृपापात्र ममाहमितित्यक्त्वा अस्ताहमिभावयन्नितरार्थः ३

खट्वांगोनामराजर्षिर्ज्ञात्वेयत्तामिहायुषः॥मुहूर्त्तात्सर्वमुत्सृज्यगतवानभयंहरिं॥१३॥
तवाप्येतर्हिकौरव्यसप्ताहंजीवितावधिः॥उपकल्पयतत्सर्वंतावत्पत्सांपरायिकं॥१४॥
अंतकालेतुपुरुषआगतेगतसाध्वसः॥छिंद्यादसंगशस्त्रेणस्पृहांदेहेनुयेचतं॥१५॥
गृहात्प्रव्रजितोधीरःपुण्यतीर्थजलाप्लुतः॥शुचौविविक्तआसीनोविधिवत्कल्पितासने॥
॥१६॥

भ्यः॥असंगोनामअनासक्तिः तेनशस्त्रेणस्पृहांसुखैकांतंदेहमनुयेपुत्रकलत्रादयःतेष्वपिस्पृहांछि
न्द्यात्॥१५॥किंचगृहात्प्रव्रजितःनिर्गतःगृहेस्थितस्यपुनरप्यासक्तिसंभवात्॥तत्राष्टांगयोगमाह॥धी
रइतिब्रह्मचर्यादियमोपलक्षणंपुण्यतीर्थेतिस्नानादिनियमोपलक्षणं॥आसनमाहशुचावितिं॥वि
विक्तएकांते॥विधिवत्॥कुशाजिनचैलैःक्रमेणनिर्मिते॥१६॥ अ

भा० द्वि० विराड्देहस्तज्जीवस्तदंतर्यामिणामभेदमारोप्योपासनं कर्तव्यमित्याशयेनाह ॥ पातालं पादमूलं ॥ पा
४ दस्याधोभागं ॥ पातालादीनां तदवयवता विधीयते ॥ पातालादीन्यतलांतानि अधस्तनादारभ्य सप्त
भूमिविवराणि पठंतिगृणंतीत्यादिक्रमेण प्रदर्शनं ॥ पार्ष्णिप्रपदे पादस्य पश्चात्पुरोभागौ ॥ २६ ॥ ऊरू

पातालमेतस्य हि पादमूलं पठंति पार्ष्णिप्रपदे रसातलं ॥ महातलं विश्वसृजोथ गुल्फौ
तलातलं वै पुरुषस्य जंघे ॥ २६ ॥ द्वे जानुनी सुतलं विश्वमूर्तेरूरुद्वयं वितलं चातलं च ॥ म
5 हीतलं तज्जघनं महीपते नभस्तलं नाभिसरो गृणंति ॥ २७ ॥ उरःस्थलं ज्योतिरनीक
मस्य ग्रीवा महर्वदनं वै जनोस्य ॥ तपो रराटीं विदुरादिपुंसः सत्यं तु शीर्षाणि सहस्र
शीर्ष्णः ॥ २८ ॥ इंद्रादयो बाहव आहुरुस्राः कर्णौ दिशः श्रोत्रममुष्य शब्दः ॥ नासत्यदस्रौ
परमस्य नासे घ्राणोस्य गंधो मुखमग्निरिद्धः ॥ २९ ॥

द्वयं तस्य अधोभागे वितलं उत्तरभागे अतलमिति ज्ञेयं नाभिरेव सरः ॥ २७ ॥ ज्योतिरनीकं ज्योतिषां समूहं
स्वर्गमहर्लोकं ग्रीवेति गृणंति ॥ तपोलोकं रराटीं ललाटं सत्यं सत्यलोकं ॥ २८ ॥ उस्रा देवाः ॥ ते तेजोमय रा० म०
शरीरत्वात्ते बाहव इत्याहुः ॥ दिशः अस्मदादिश्रोत्राधिष्ठात्र्यो देवताः कर्णौ श्रोत्रस्याधिष्ठानं श ४
ब्दस्तु श्रोत्रविषयः सन् तत्स्थश्रोत्रेंद्रियपाणवं नासिकादिष्वपि नासत्यदस्रौ अश्विनौ नासे नासापुटे इद्धः दीप्तः ॥ २९ ॥

प्रसीदति उपशमप्रतिगुणवशात्पुनरपि क्षोभे सति धारणामेव स्थिरीकुर्यादित्याह ॥ रजसाक्षिप्तंतमसा विमूढं स्वीयं मनो निरुंध्यात् ॥ तत्कृतं रजस्तमोभ्यां कृतं ॥२०॥ यतः प्रस्यां क्रियमाणायां भद्रं सुखात्मकं ॥ आश्रयं विषयं पश्यतः तत्रैव भक्तिर्भवति ॥२१॥ यथा यत्र यादृशी चेति कर्त्तव्यता विषय ॥ तत्तद्विशेषणानां प्रश्नाः ॥२२॥ यथे

पदं तत्परमं विष्णोर्मनो यत्र प्रसीदति ॥ रजस्तमोभ्यामाक्षिप्तं विमूढं मन आत्मनः ॥ यच्छेद्धारणया धीरो हंति या तत्कृतं मलं ॥२०॥ यस्यां संधार्यमाणायां योगिनो भक्तिलक्षणः ॥ आशु संपद्यते योग आश्रयं भद्रमीक्षतः ॥२१॥ श्रीराजोवाच ॥ यथा संधार्यते ब्रह्मन्धारणा यत्र संमता ॥ यादृशी वा हरेदाशु पुरुषस्य मनोमलं ॥२२॥ श्रीशुक उवाच ॥ जितासनो जितश्वासो जितसंगो जितेंद्रियः ॥ स्थूले भगवतो रूपे मनः संधारयेद्धिया ॥२३॥ विशेषस्तस्य देहोयं स्थविष्ठश्च स्थवीयसां ॥ यत्रेदं दृश्यते विश्वं भूतं भव्यं भवच्च सत् ॥२४॥ अंडकोशे शरीरेस्मिन् सप्तावरणसंयुते ॥ वैराजः पुरुषो योसौ भगवान्धारणाश्रयः ॥२५॥

त्रस्योत्तरं ॥ जितासन इति ॥ विषयमाह ॥ स्थूल इति सार्द्धेन ॥२३॥ विशेषो विराट्देहः अतिस्थूलानामपि स्थूलतरः ॥ सत्कार्यमात्रं ॥२४॥ अस्य चोपलक्षणत्वेन विषयत्वं वस्तुतस्तु विराड्जीवे नियंता भगवानेव विषय इत्याह ॥ अंडकोशांतर्वर्त्तिनि कटाह एव पृथिव्यावरणं ॥ ततः अपतेजोवाय्वाकाशाहंकारमहत्तत्वानीति सप्त ॥२५

अनिष्यमानं सदा वर्त्तके उपलक्षण विराजानं सद नाथ्यावरकं विशेषणं २

विज्ञानशक्तिं चित्तं महिमं महत्तत्वं ॥ अंतःकरणं अहंकारं गिरित्रं श्रीरुद्रं ॥ गर्दभाद्वडवायामुत्पन्ना अश्व
तरी ॥ ३५ ॥ वयांसि पक्षिणः तस्य व्याकरणं नामरूपे व्याकरवाणीति श्रुत्यक्तं शिल्पनैपुणं ॥ यथा
हुः ॥ येन शुक्लीकृता हंसाः शुकाश्च हरितीकृताः ॥ मयूराः चित्रिता येन स ते वृत्तिं विधास्यतीति म
नुः स्वायंभुवः मनीषा बुद्धिः ॥ मनुजः पुरुषः निवासः आश्रयः ॥ पुरुषत्वे चाविस्तरामात्मेति श्रु

विज्ञानशक्तिं महिमामनंति सर्वात्मनोंतःकरणं गिरित्रं ॥ अश्वाश्वतर्युष्ट्रगजा नखानि स
र्वे मृगाः पशवः श्रोणिदेशे ॥ ३५ ॥ वयांसि तद्व्याकरणं विचित्रं मनुर्मनीषा मनुजो निवा
सः गंधर्वविद्याधरचारणाप्सरः स्वरस्मृतीरसुरानीकवीर्यः ॥ ३६ ॥ ब्रह्माननं क्षत्रभुजो म
हात्मा विडूरुरंघ्रिश्रितकृष्णवर्णः ॥ नानाभिधाभीज्यगणोपपन्नो द्रव्यात्मकः कर्म्म विता
नयोगः ॥ ३७ ॥

तैः गंधर्वादीनां द्वंद्वैकं ॥ गंधर्वादयः स्वरस्मृतीः षड्जादिस्वरस्मृतय इत्यर्थः
असुरानीकं वीर्यं यस्य सः ॥ स्मृतिरसुरानीकवर्य इति पाठे गंधर्वादयः स्वरः ॥ असुरसमूह
श्रेष्ठः प्रह्लादः स्मृतिस्तस्येति ॥ ३६ ॥ ब्रह्मा विप्रस्तस्याननं मुखं क्षत्रं क्षत्रियो भुजा यस्य ॥
विट् वैश्यः ऊरुरूपस्य ॥ अंघ्रिं श्रितः कृष्णवर्णः शूद्रो यस्य नानाभिधाना मानियेषां ते च ते इ राम०
भीज्या देवास्तेषां गणो वसुरुद्रादिभिरुपपन्नो युक्तः द्रव्यात्मको हविःसाध्यः वितानयोगः य ५
ज्ञप्रयोगः तस्य कर्म कार्यं आवश्यकोऽभिप्रेत इत्यर्थः ॥ ३७ ॥ ॥

द्यौरंतरिक्षं अक्षिणी नेत्रगोलके चक्षुरिंद्रियं ॥ पतंगः सूर्यः अहनी रात्र्यहनी ॥ परमेष्ठिधिष्ण्यं ब्रह्मप
दं तालु अधिष्ठानं जिह्वा इंद्रियं ॥३०॥ छंदांसि वेदाः शिरो ब्रह्मरंध्रं स्नेहकलाः ॥ पुत्रादिस्नेहल

चौरक्षिणी चक्षुरभूत्पतंगः पक्ष्माणि विष्णोरहनी उभे च ॥ तद्भ्रूविजृंभः परमेष्ठिधिष्ण्यमापोस्य
तालू रस एव जिह्वा ॥३०॥ छंदांस्यनंतस्य शिरो गृणंति दंष्ट्रा यमः स्नेहकला द्विजानि ॥
हासो जनोन्मादकरी च माया दुरंतसर्गो यदपांगमोक्षः ॥३१॥ व्रीडोत्तरोष्ठोऽधर एव लोभो
धर्मः स्तनोऽधर्मपथोऽस्य पृष्ठः ॥ कस्तस्य मेढ्रं वृषणौ च मित्रौ कुक्षिः समुद्रा गिरयोऽस्थिसं
घाः ॥३२॥ नद्योऽस्य नाड्योऽथ तनूरुहाणि महीरुहा विश्वतनोर्नृपेंद्र ॥ अनंतवीर्यः श्वसि
तं मातरिश्वा गतिर्वयः कर्मगुणप्रवाहः ॥३३॥ ईशस्य केशान्विदुरंबुवाहान्वासस्तु सं
ध्यां कुरुवर्य भूम्नः ॥ अव्यक्तमाहुर्हृदयं मनश्च स चंद्रमाः सर्वविकारकोशः ॥३४॥ राम

शाः द्विजानि दंताः घउत्वमार्घं दुरंतः सर्गा इति यत्सतस्य कटाक्षः ॥३१॥ अधर्म्ममार्गोस्य पृष्ठ
भागः कः प्रजापतिः ॥ मित्रौ मित्रावरुणौ ॥३२॥ अनंतं वीर्यं यस्य सः ॥ वयः कालस्तस्य गमनं
गुणप्रवाहः प्राणिनां संसारः कर्म्म तस्य क्रीडा ॥३३॥ भूम्नः विभोः ॥ अव्यक्तं प्रधानं सः प्रसिद्धः
चंद्रमाः तदीयं मनः ॥ सर्वेषां विकाराणां कोश इवाश्रयः संभूतं ॥३४॥ ॥

भा० द्वि० दश्यपालं वनरूपैव मुक्तावै राजधारणा इहोच्यते तु तत्साधनासर्वांतर्यामिधारणा ॥ तत्र तावत्सर्वांतर्धा
६ रणाया अवांतरफलमाह ॥ एवं याधारणा तयातु ध्याइदूरे पुरा प्रलयसमयेन ध्वांसर्वृष्टिसमप्तिं
6 प्रत्यवरुध्यलब्धा अप्ययात्मागिदं विश्वं यथासीत् ॥ तथा ससर्ज ॥ व्यवसायात्मिका बुद्धिर्य
स्य ॥ अतएवामोघादृष्टिर्यस्येति ॥ अतस्तया धारणाया विश्वसृष्टिसामर्थ्यं भवति ॥ १ ॥ उपा

एवं पुरा धारणयात्मयोनिर्नष्टां स्मृतिं प्रत्यवरुध्य तुष्टात् ॥ तथा सस
र्जेदममोघदृष्टिर्यथाप्ययात् प्राक् व्यवसायबुद्धिः ॥ १ ॥ शाब्दस्य हि
ब्रह्मण एष पंथा यन्नामभिर्ध्यायति धीरपार्थैः ॥ परिभ्रमंस्तत्र न
विंदतेर्थान्मायामये वासनया शयानः ॥ २ ॥ ॥ ॥

सनफलादपि विरक्तस्य शुद्धात्मधारणायामधिकारः ॥ अतो वैराग्यार्थं सर्वं कर्मफलं निंद
ति ॥ शाब्दं शब्दमयं ब्रह्म वेदः ॥ तस्य एष पंथाः कर्मफलबोधनप्रकारः ॥ को सौ अर्थैरपार्थैरे
व स्वर्गादिनामभिः साधकस्य धीर्ध्यायति ॥ तत्र दिक्षां करोतीति पत् ॥ अपार्थत्वमेवाह त
त्र मायामये पथि सुखमिति वासनया शयानः ॥ स्वप्नान् पश्यन्निव परिभ्रमन् अर्थान् न राम०
विंदति ॥ तत्र लोकं प्राप्तो पि निरवद्यं सुखं न लभत इत्यर्थः ॥ २ ॥ ॥ ६

इयानेतावान्संनिवेशः अवयवसंस्थानं॥अस्मिन्स्वबुध्यामनःसंधार्यतेमुमुक्षुभिर्यतोव्यतिरि
क्तंकिंचिन्नास्तितस्मिन्॥३८॥नन्वेवंचित्तस्थैर्यार्थीविशारदोदेहजीवेश्वराणाम‌भेदेनोपासन
मुक्तं॥तत्रतुदेहजीवावीश्वरेप्रविलाप्यसएवध्येयइतिनिर्द्धारयति॥सइति॥सर्वाधीवृ
त्तिभिरनुभूतंसर्वंयेन॥सएकएव॥सर्वत्रआत्मा॥तंएवसत्यंभजेतअन्यत्रोपलक्षणेनस

इयानसावीश्वरविग्रहस्ययःसन्निवेशःकथितोमयाते॥संधार्यतेस्मिन्व
पुषिस्थविष्ठेमनःस्वबुध्यानयतोस्तिकिंचित्॥३८॥ससर्वधीवृत्त्यनुभूत।
सर्वआत्मायथास्वप्नजनेक्षितैकः॥तंसत्यमानंदनिधिंभजेतनान्यत्रस
ज्जेद्यतआत्मपातः॥३९॥इतिश्रीभागवतेमहापुराणेद्वितीयस्कंधेम।
हापुरुषसंस्थानुवर्णनेप्रथमोध्यायः॥१॥श्रीशुकउवाच॥ ॥

जेत॥यतआसंगात्आत्मनःपातःसंसारोभवति॥एकस्यतत्तदिंद्रियैःसर्वानुभूतौदृष्टांतः
स्वप्नजनानामीक्षितायथेति॥स्वप्नेहिकदाचित्बहून्देहान्प्रकल्प्यजीवस्तत्तदिंद्रियैःस
र्वंपश्यतितद्वत्ईश्वरस्यतुविद्याशक्तित्वान्नबंधः॥३९॥द्वितीयेप्रथमोध्यायः॥द्वितीयेतुतत्र
स्थूलधारणयाजितंमनःसर्वसाधिष्ठानेसर्ववेशेविष्णौधार्यमितीर्यते॥१॥ ॥

भा० द्वि० तदानेन किं कर्तव्यं हरिस्तु सेव्य इत्याह ॥ एवं विरक्तः सन् तं भजेत् ॥ भजनीयत्वे हेतवः । स्वचि-
७ त्ते स्वत एव सिद्धः यतः आत्मा अत एव प्रियः प्रियस्य च सेवा सुखरूपैव ॥ अर्थः सत्यः ॥ न त्वनात्म-
वन्मिथ्या भगवान् भजनीयगुणश्च अनंतश्च नित्यः ॥ य एवंभूतः तं भजेत् ॥ नियतार्थः निश्च-
लस्वरूपः तदनुभवानंदेन निर्वृतः सन्निति स्वतः सुखात्मत्वं दर्शितं ॥ किंच यत्र यस्मिन् भ-
जने सति संसारहेतोरविद्याया उपरमो नाशो भवति ॥ ६ ॥ एतदेवान्यचिंतानिंदया द्रढय-

एवं स्वचित्ते स्वत एव सिद्ध आत्मा प्रियोऽर्थो भगवाननंतः ॥ तं निर्वृतो नियतार्थो भ-
जेत संसारहेतूपरमश्च यत्र ॥ ६ ॥ कस्तां त्वनादृत्य परानुचिंतामृते पशूनसतीं
नाम कुर्यात् ॥ पश्यन् जनं पतितं वैतरण्यां स्वकर्मजान् परितापान् जुषाणं ॥ ७ ॥

ति ॥ क इति । तां तथाभूतां परस्य हरेरनुचिंतां धारणाम् अनादृत्य पशून् कर्मजडान् विना
यथा पशुरेवं स देवानामिति श्रुतेः असतीं विषयचिंतां को नाम कुर्यात् ॥ तया चिंतया वैत-
रण्यां पतितं ॥ तत्र च स्वकर्मजान् आध्यात्मिकादिक्लेशान् सेवमानं जनं पश्यन् ॥ वै- राम
तरणी यमद्वारस्था नदी तत्तुल्यत्वात् संसृतिर्वैतरणी ॥ ७ ॥ ॥ ७

तर्हिसर्व्वथाकर्म्मफलत्यागेसत्याएवदेहपातःस्यादित्याशंक्याह॥ अतःकविर्नाममात्रेषुभोगेषुयाव
तार्थेनअर्थ्यदिहनिर्वाहो यस्यतथाभूतःस्यात्॥ अप्रमत्तःतावन्मात्रेप्यनासक्तः॥ व्यवसायाबुद्धि
र्नेदंसुखमिति निश्चयवान्तदापितत्रतस्मिन्नर्थे अन्यथैवासिद्धेसति॥ नत्रयत्नेपरिश्रमंप
श्यन्नयतेत॥३॥ अन्यथासिद्धिमाहद्वाभ्यांसत्यामितिकशिपोःशय्यायाःस्वतःसिद्धेबाह्वौस

अतःकविर्नामसुयावदर्थःस्यादप्रमत्तोव्यवसायबुद्धिः॥ सिद्धेन्यथार्थेनयतेतत्रसःपरि
श्रमंतत्रसमीक्षमाणः॥३॥ सत्यांक्षितौकिंकशिपोःप्रयासैर्बाहौस्वसिद्धेह्युपबर्हणैःकिं
सत्यंजलौकिंपुरुधाऽन्नपात्र्यादिग्वल्कलादौसतिकिंदुकूलैः॥४॥ चीराणिकिंपथि
नसंतिदिशंतिभिक्षांनैवांघ्रिपाःपरभृतःसरितोप्यशुष्यन्॥ रुद्धागुहाःकिमजितोव
तिनोपसन्नान्कस्माद्भजंतिकवयोधनदुर्मदांधान्॥५॥

त्युपबर्हणैःउच्छीर्षकैः॥ पुरु
धाबहुप्रकारयाअन्नपात्र्याभोजनपात्रेण॥४॥ ननुदिक्सद्भावोनामनग्नत्वमेव॥ वल्कलम
न्नतोयंवासस्थानंचयाअवाप्ययत्नंविनाकथंप्राप्येततत्राह॥ चीराणिवस्त्रखंडानि॥ परान्बिभ्र
तिपुष्णंतिफलादिभिर्ये॥ गुहाःगिरिदर्यःननुकदाचिदेषामलाभेकिंकार्यं॥ तत्राह॥ अजितोहरिः
उपसन्नान्शरणागतान्किंनअवतिनरक्षतिकिंशब्दस्यपर्वत्रापिसंबंधः॥ धनेनयोदुर्मदस्तेनअंधा
॥५

भा०टि० ८ अदीनं उदारं यल्लीलाहसितं ॥ तेन यदीक्षणं तस्मिन् उल्लसंतौ ये भ्रूभंगाः भ्रूविक्षेपास्तैः संसू-
चितो भूरिरनुग्रहो येन ॥ चिंतामयं चिंतया आविर्भवंतं ॥१२॥ अस्यैव ध्यानमाह ॥ एकैकश इ-
ति ॥ अनुभावयेत् ध्यायेत् ॥ यद्यज्जितं अयत्नतः स्फुरितं पादगुल्फादिस्थानं अवयवस्तत्तद

अदीनलीलाहसितेक्षणोल्लसद्भ्रूभंगसंसूचितभूर्यनुग्रहं ॥ ईक्षेत चिंतामयमेनमीश्व-
रं यावन्मनो धारणयावतिष्ठते ॥१२॥ एकैकशोंऽगानि धियानुभावयेत्पादादि यावद्धसि-
8 तं गदाभृतः ॥ जितं जितं स्थानमपोह्य धारयेत्परं परं शुद्ध्यति धीर्यथा यथा ॥१३॥ यावन्न जा-
येत परावरेऽस्मिन् विश्वेश्वरे द्रष्टरि भक्तियोगः ॥ तावत्स्थवीयः पुरुषस्य रूपं क्रियावसा-
ने प्रयतः स्मरेत ॥१४॥

पोह्य त्यक्त्वा परं परं जंघाजान्वादि धारयेत् ध्यायेत् शुद्ध्यति तस्मिन् निश्चला भवति ॥१३॥ पूर्वो-
क्त वैराजधारणाया एतद्धारणां गत्वमाह यावदिति परे ब्रह्मादयोऽवरे यस्मात् कुतः विश्वे-
श्वरे द्रष्टरि नतु दृश्ये चैतन्यघनत्वात् ॥ भक्तियोगः प्रेमलक्षणः ॥ क्रियावसाने आवश्यक-
कर्मानुष्ठानानंतरं ॥ अनेन कर्माविभक्तियोगपर्यंतमेवेत्युक्तं ॥१४॥ ॥ राम० ८

तामेव धारणां सविशेषणां माह केचिदिति षड्भिः। स्वदेहस्यांतर्मध्ये यत् हृदयं तत्र योवकाशस्त
स्मिन् वसंतं ॥ प्रादेशस्तर्जन्यंगुष्ठयो विस्तारः स एव मात्रा प्रमाणं यस्येति ॥ हृदयपरिमाणं त
त्रोपचर्यते ॥ कंजं पद्मं रथांगं चक्रं ॥८॥ नलिनं पद्मं तद्वत् प्रसन्ने आयते दीर्घे ईक्षणे यस्य कदंबकु
सुमस्य किंजल्काः केसरास्तद्वत् पिशंगे पीते वाससी यस्य ॥ लसंति महारत्नानि येषु तानि सुवर्ण

केचित्स्वदेहांतर्हृदयावकाशे प्रादेशमात्रं पुरुषं वसंतं ॥ चतुर्भुजं कंजरथांगशंखगदाध
रं धारणया स्मरंति ॥८॥ प्रसन्नवक्त्रं नलिनायतेक्षणं कदंबकिंजल्कपिशंगवाससं ॥ लसन्महा
रत्नहिरण्मयांगदं स्फुरन्महारत्नकिरीटकुंडलं ॥९॥ उन्निद्रहृत्पंकजकर्णिकालये योगेश्वरा
स्थापितपादपल्लवं ॥ श्रीलक्ष्मणं कौस्तुभरत्नकंधरं अम्लानलक्ष्म्या वनमालयाचितं ॥१०॥ वि
भूषितं मेखलयांगुलीयकैर्महाधनैर्नूपुरकंकणादिभिः ॥ स्निग्धामलाकुंचितनीलकुंत
लैर्विरोचमानाननहासपेशलं ॥११॥

मयान्यंगदानि यस्य ॥ स्फुरंति खचितानि महारत्नानि च तन्
मयानि किरीटकुंडलानि यस्य ॥९॥ उन्निद्रं विकसितं यत् हृत्पंकजं तस्य कर्णिकैवालयः स्था
नं तस्मिन् योगेश्वरैरास्थापितौ पादपल्लवौ यस्य ॥ श्रीर्वत्सचिह्नं तल्लक्ष्म पामादिविहितो मत्वर्थी
येन प्रत्ययः ॥ कौस्तुभरत्नं कंधरायां यस्य ॥ अम्लाना लक्ष्मीः शोभा यस्याः तया वनमालया आचितं
व्याप्तं ॥१०॥ स्निग्धत्वादिविशिष्टैः कुंतलैर्विरोचमाने आनने यो हासः तेन पेशलं सुंदरं ॥११॥

भा० द्वि० निरुपाधित्वं कुत इत्यत आह ॥ परमिति ॥ यद्यस्मात् अनतत् आत्मव्यतिरिक्तं नेति नेतीत्येवमुत्सृषु
६ मिक्षवो दौरात्म्यं देहाद्यात्मत्वं विसृज्य अर्हस्य परस्य श्री विष्णोः पदं पदे पदे हृदा उपगु गेह
ह्य आश्लिष्य नान्यस्मिन् सौहृदं येषां तथाभूताः संतः तद्वैष्णवं पदं अत एव परं सर्वतः श्रेष्ठं मा
मनंतीत्यन्वयः ॥१८॥ तस्मादिदं ब्रह्मत्वेन व्यवस्थितो मुनिरुपरमेत् ॥ तुशब्देन यदि न याया

परं पदं वैष्णवमामनंति तद्यन्नेति नेतीत्यतदुत्सिसृक्षवः ॥ विसृज्य दौरात्म्यमनन्यसौ
9 हृदा हृदोपगुह्यार्हपदं पदे पदे ॥१८॥ इत्थं मुनिस्तूपरमेद्व्यवस्थितो विज्ञानदृग्वीर्य
सुरंधिताशयः ॥ स्वपार्ष्णिनापीड्य गुदं ततोऽनिलं स्थानेषु षट्सून्नमयेज्जितक्लमः ॥१९॥

स्यान्निर्विद्यमानात् सकामाद्विशेषमुक्तः तमाह ॥ विज्ञायतेऽनेनेति विज्ञानं शास्त्रं तेन जा
तादृक् ज्ञानं तस्य वीर्यं बलं तेन सुरंधिताः विहिंसिताः ॥ आशया विषयवासना यस्य सः
इदानीं तस्य देहत्यागप्रकारमाह ॥ स्वपार्ष्णिना पादमूलेन गुदं मूलाधारं आपीड्य निरुध्य
अनिलं प्राणं उन्नमयेत् ऊर्ध्वं नयेत् ॥ जितः क्लमो येन षट्सु स्थानेषु नाभ्यादिषु ॥१९॥ स्वस्म राम०
६

एवंतावदासन्नमृत्योःपुंसःकृत्यमुक्तंइदानीतस्यैवस्वयंदेहंत्यक्तुमिच्छतःकृत्यमाह॥स्थिरमितिसा
र्द्धैश्चतुर्भिः॥अंगहेराजन्एवंभूतो यतिर्यदाइमंलोकंदेहंजिहासुःहातुमिच्छतितदादेशेपु
ण्येतीर्थेकालेचउत्तरायणादौमनोनसज्जयेत्संगंनप्रापयेत्नदेशकालौयोगिनःसिद्धिहेतूकिं
तुयोगएवेतिदृढनिश्चयोभूत्वास्थिरंसुखकरंचासनमास्थितःप्राणान्नियच्छेदित्यर्थः॥१५॥एतांम
बुद्धिंक्षेत्रज्ञेबुद्ध्यादिद्रष्टरिनिनयेत्प्रविलापयेत्॥तंचक्षेत्रज्ञंआत्मनिशुद्धेतंचशुद्धमात्मा

स्थिरंसुखंचासनमाश्रितोयतिर्यदाजिहासुरिममंगलोकं॥कालेचदेशेचमनोनसज्जयेत्
प्राणान्नियच्छेन्मनसाजितासुः॥१५॥मनःस्वबुद्ध्याऽमलयानियम्यक्षेत्रज्ञएतांनिनयेत्तमा
त्मनि॥आत्मानमात्मन्यवरुध्यधीरोलब्धोपशांतिर्विरमेतकृत्यात्॥१६॥नयत्रकालोनिमिषांप
रःप्रभुःकुतोनुदेवाजगतांयईशिरे॥नयत्रसत्वंनरजस्तमश्चनवैविकारोनमहान्प्रधानं॥१७

नंआत्मैवाहं इतिआत्मनिब्रह्मणिअवरुध्यएकीकृत्यलब्धोपशांतिःप्राप्तनिर्वृतिःसन्कृत्याद्वि
रमेत्ततःपरंप्राप्याभावात्॥१६॥तदेवाह नयत्रेति॥यत्रात्मस्वरूपेकालोनप्रभुःकिमपिकर्त्तुंनसम
र्थः॥अतएवदेवाःनप्रभवइत्याह॥अनिमिषांदेवानांपरःप्रभुःकालोपियत्रनप्रभुःतत्रकुतोनुदेवाःप्र
भवेयुः॥देवनियम्यानांतुजगतांप्राणिनांकावार्त्तेत्याहजगतामितिकुतोनप्रभवंतीत्यपेक्षायांनिरुपाधि
त्वादित्याह॥नयत्रेति॥यद्वाजगत्कारणान्यपिनयस्यसंबंधादौप्रभवंतीत्याहनयत्रेतिविकारोऽहंकारः॥१७

भा० द्वि० यतः कर्म्मगतिवन्न योगगतिः परिच्छिन्नेत्याह ॥ योगेश्वराणां त्रिलोक्या अंतर्बहिश्च महर्लो-
१० कादिषु ब्रह्मांडाद्बहिश्च गतिमाहुः ॥ अत्र हेतुः पवनस्यांतः आत्मा लिंगशरीरं येषामिति वि-
द्योपासना ॥ तपो भगवद्धर्म्मः योगोष्टांगः समाधिर्ज्ञानं तानि ये भजंति तेषां योगगतिस्तां ॥
२३ तामाह ॥ वैश्वानरमित्यष्टभिः ॥ विहायसा आकाशेन तत्र चैव ब्रह्मलोकपथेन गतः ॥ स

योगेश्वराणां गतिमाहुरंतर्बहिस्त्रिलोक्याः पवनांतरात्मनां ॥ न कर्म्मभिस्तां गतिमाप्नु-
वंति विद्यातपोयोगसमाधिभाजां ॥ २३ ॥ वैश्वानरं याति विहायसा गतः सुषुम्णया ब्र-
10 ह्मपथेन शोचिषा ॥ विधूतकल्कोथ हरेरुदस्तात्प्रयाति चक्रं नृप शैशुमारं ॥ २४ ॥ राम

न प्रथमं वैश्वानरं अग्न्यभिमानिनीं देवतां याति केनोपायेन सुषुम्णया नाड्या सा च देहा-
द्बहिरपि विनतास्तीत्याह ॥ शोचिषा ज्योतिर्म्मय्या ॥ विधूतः त्यक्तः कल्कोमलं येन सः क्वा-
प्यसज्जमान इत्यर्थः ॥ उदस्तात् उपरिष्टाद्वर्त्तमानं हरेः संबंधि तारारूपं नारायणाधिष्ठि-
तमित्यर्थः शैशुमारं चक्रं पंचमस्कंधे वक्ष्यमाणां शिशुमाराख्यं ज्योतिश्चक्रं ॥ चक्रस्थाना- राम०
नि आदित्यादिध्रुवांतानि पदानि प्रयातीत्यर्थः ॥ २४ ॥ ॥ ॥ १०

नाभ्यां मणिपूरके स्थितं हृदि अनाहतचक्रे अधिरोप्य उरसि कंठादधोदेशे स्थिते विशुद्धिचक्रे॥ म
नस्वी जितचित्तः स्वतालुमूलं तस्यैव चक्रस्याग्रदेशं॥ ततो बुद्ध्यागमनसंभवाच्छनकैरित्युक्तं॥२०
तस्माद्भ्रुवोरंतरं आज्ञाचक्रे॥ निरुद्धानि श्रोत्रे नेत्रे नासिके मुखं चेत्येवं सप्तायतनानि प्राणमा
र्गा येन सः॥ अनपेक्षश्चेत्परं ब्रह्मगतः सन् मूर्द्धनि ब्रह्मरंध्रं निर्भिद्य देहमिंद्रियाणि च विसृ

नाभ्यां स्थितं हृद्यधिरोप्य तस्मादुदानगत्योरसि तं नयेन्मुनिः। ततोनुसंधाय धिया मनस्वी
स्वतालुमूलं शनकैर्नयेत॥२०॥ तस्माद्भ्रुवोरंतरमुन्नयेत निरुद्धसप्तायतनोऽनपेक्षः।
स्थित्वा मुहूर्तार्द्धमकुंठदृष्टिर्निर्भिद्य मूर्द्धं विसृजेत्परं गतः॥२१॥ यदि प्रयास्यन्नृप पारमे
ष्ठ्यं वैहायसानामुत यद्विहारं॥ अष्टाधिपत्यं गुणसंन्निवाये सहैव गच्छेन्मनसेंद्रियैश्च॥२२

जेत्॥२१॥ स चो मुक्तिमुत्क्राक्रममुक्तिमारुह्य यदीति दशभिः॥ यदि तु पारमेष्ठ्यं पदं प्रयास्य
प न्भवति॥ वैहायसानां खेचराणां सिद्धानां यद्विहारं क्रीडास्थानं कीदृशं॥ अष्टावाधिपत्यानि अ
णिमाद्यैश्वर्याणि यस्मिन्॥ तदपि प्रयास्यन् क्व गुणसंनिवाये गुणसमुदायरूपे ब्रह्मांडे
सर्वत्रेत्यर्थः॥ तर्हि देहत्यागावसरे मनइंद्रियाणि च न त्यजेत्॥ किंतु तैः सहैव तत्तल्लोकभोगा
र्थं गच्छेत्॥२२॥

भा॰ द्वि॰
११

तत्र भक्तस्तस्य भगवद्भक्तस्य ब्रह्मांडभेदनप्रकारमाह ॥ तत इत्यादिना ॥ तत्रैपं प्रक्रिया ॥ ईश्वराधिष्ठितायाः प्रकृतेः केनचिदंशेन महत्तत्वं भवति ॥ तस्यांशेनाहंकारः तस्यांशेन शब्दतन्मात्रद्वारा नभः तस्यांशेन स्पर्शतन्मात्रद्वारा वायुः तस्यांशेन रूपतन्मात्रद्वारा तेजः तस्यांशेन रसतन्मात्रद्वारा आपः तदंशेन गंधतन्मात्रद्वारा पृथ्वी तैश्च मिलितैश्चतुर्दशभुवनात्मकं विराट्शरीरं ॥ तस्य च पंचाशत्कोटियोजनविशालस्य पृथिव्येवांडकटाह विशेषशब्दवाच्या कोटियोजनविशालं प्रथमावरणं पंचाशत्कोटिविशालमित्येके ॥ ततश्चाऽब्वादीनां ये

11

ततो विशेषं प्रतिपद्य निर्भयस्तेनात्मनापोनलमूर्तिरत्वरन् ॥ ज्योतिर्मयो वायुमुपेत्य काले वा
य्वात्मना खं बृहदात्मलिंगं ॥२८॥ घ्राणेन गंधं रसनेन वै रसं रूपं तु दृष्ट्या श्वसनं त्वचैव ॥ श्रोत्रेण
चोपेत्य नभोगुणत्वं प्राणेन चाकूतिमुपैति योगी ॥२९॥

परिणतांशाः तान्येवोत्तरोत्तरदशगुणान्याव रणानि अशेषमेतु प्रकृत्यावरणं व्यापकमेव ॥ तदेवं स्थिते पृथिव्याद्यावरणभेदप्रकारः कथ्यते ॥ ततो विशेषं प्रतिपद्य लिंगदेहेन पृथिव्यात्मतां प्राप्येत्यर्थः ॥ एवमुत्तरत्रापि द्रष्टव्यं निर्भयः कथं यास्यामीति शंकाशून्यः तेनात्मना पृथिवीरूपेण तन्निरंतरा अपः प्रतिपद्य अत्वरन् त्वरामकुर्वन् तत्तदात्मत्वेन क्लेददाहादिशंकाभावाय थेष्टं भोगान् भुंजानः इत्यर्थः ॥ एवं ज्योतिर्मयः सन् काले भोगावसाने बृहत् आत्मनो लिंगं परमात्ममूर्तित्वेनोपासनेष्टं ॥ यद्वा वेदशब्दात्मना तस्य प्रकाशकमिति ॥२८॥ इंद्रियार्थानामपि तत्सूक्ष्माणामतिक्रममाह घ्राणेना

सामयजुर्ऋग्वेदाः शब्द[illegible]स्वरूपा मंत्रा?

[illegible] ॥२८॥

[illegible]

राम॰
११

तद्विश्वे॰ः चक्रं शिशुमारस्य नाभिं सर्वाश्रयभूतं आविश्य द्विंगत्वा नाभिशब्दस्य नपुंसकत्वं ॥ अतिवर्त्य अतिक्रम्य प
रतः स्वर्गिणांगत्यभावादेक एव निर्मलेन लिंगशरीरेण ब्रह्मविदां स्थानं अन्यैर्नमस्कृतं महर्लोकमुपैति
यच्चास्मिन् विबुधा महाकल्पायुषो भृग्वादयः ॥२५॥ अथो अनंतरं कल्पांते स विश्वं त्रैलोक्यं अतिशयेन द
ह्यमानं निरीक्ष्य तत्राप्यूष्मणार्त्तः पतद्विपरार्द्धस्थायितत्वात् पारमेष्ठ्यं पदं प्रति निर्याति सिद्धेश्वरैर्जुष्टानि धि
ष्ण्यानि विमानानि यस्मिन् तत् ॥ उइति श्लेषः संचितं ॥२६॥ तदेवाह न यत्रेति ॥ आर्त्तिः दुःखं उद्वेगो भयं कि

तद्विश्वनाभिं त्वतिवर्त्य विष्णोरणीयसा विरजेनात्मनैकः ॥ नमस्कृतं ब्रह्मविदामुपैति कल्पा
युषो यद्विबुधा रमंते ॥२५॥ अथो अनंतस्य मुखानलेन दंदह्यमानं स निरीक्ष्य विश्वं ॥ निर्याति
सिद्धेश्वरजुष्टधिष्ण्यं यद्द्वैपरार्द्धं तदु पारमेष्ठ्यं ॥२६॥ न यत्र शोको न जरा न मृत्युर् नार्तिर् न चो
द्वेग ऋते कुतश्चित् ॥ यच्चित्ततोऽदः कृपयानिदंविदां दुरंतदुःखप्रभवानुदर्शनात् ॥२७॥

तच्चित्ततो हेतोर्यद्दुःखं अदः ॥ अनेन तदेकं विनिर्वृत्तं कुतो भवति अनिदंविदां इदं भगवतो ध्यानमजानतां प्राणिनां
दुरंतदुःखोपप्रभवो जन्मतस्यानुदर्शनात् । तेषां कृपया यद्वा चित्ततो दोमनः पीडेति पतत्तत् विना कुतोऽपि
दपि पत्र शोकादयो न संतीति तत्र ब्रह्मलोकं गतानां त्रिविधा गतिः ॥ ये पुण्योत्कर्षेण गताः ते कल्पांतरे पुण्य
तारतम्येनाधिकारिका भवंति ॥ ये तु हिरण्यगर्भोपासनाबलेन गताः ते ब्रह्मणा सह मुच्यंते । ये तु भगवदु
तेषांकृपयायद्दुःखंतेनविनाअन्यशोकादिकंनास्तीतिअर्थः२

यासकाः ते स्वेच्छया ब्रह्मांडं भित्त्वा वैष्णवं पदमारोहंति ॥२७॥

सृतीमार्गौप्रकारावित्यर्थः॥ हेनृप॥ अनपेक्षोनिर्भिद्यमूर्द्धविसृजेत्परंगतइतियासद्योमुक्तिः एकासृ
तिः यदिप्रयास्यन्नित्यादिनाक्रममुक्तिश्चद्वितीयासृतिः॥ एतेसृतीवेदेनगीतेउक्ते॥ ननुस्वोत्प्रेक्षिते
तत्रयदासर्वेप्रमुच्यंतेकामायेस्यहृदिश्रिताः॥ अथमर्त्योमृतोभवत्यत्रब्रह्मसमश्नुतइतिसद्यो
मुक्तिः तेर्चिरभिसंभवंतीत्यादिनाक्रममुक्तिश्चवेदेनोक्ता॥ यद्वा॥ नकर्मभिस्तांगतिमाप्नुवंती

एतेसृतीतेनृपवेदगीतेत्वयाभिपन्नेहसनातनेच॥ यैर्वैपुराब्रह्मणआहतुष्टआराधितो ५
भगवान्वासुदेवः॥३२॥ नह्यतोन्यःशिवःपंथाविशतःसंसृताविह॥ वासुदेवेभगवति
भक्तियोगोपतोभवेत्॥३३॥

तिदक्षिणमार्गस्यापिसूचितत्वादेतेसृतीइतिद्विवचनं॥ त्वयाभिपन्नेयच्छ्रोतव्यमित्यादिप्रश्नेनार्थान्मुक्ति
विषयेद्वेअपिसृतीपृष्टे॥ ह्रहियद्वाविपर्ययमितिदक्षिणमार्गोप्यर्थात्पृष्टः॥ एवंत्वपाचयेपृष्टेएते
सृतीइत्यन्वयः॥३२॥ संतिसंसरतःपुंसोबहवोमोक्षमार्गाः तपोयोगादयः समीचीनस्त्वयमेवेत्या
हनहीति॥ पतोयुस्थिताभ्दक्तियोगोभवेत्॥ अतोन्यःशिवः॥ सुखस्वरूपोनिर्विघ्नश्चनास्त्येव॥३३॥

तदेवंस्थूलसूक्ष्मभूतातिक्रममुत्क्रातदावरणाभूताहंकारमाप्प्राममहदादिप्राप्तिमात्र॥सयोगीविकार्यसंसाचविज्ञानतत्वंयातिविविधंकार्यमस्येतिविकार्योहंकारःसत्रिविधः॥तामसोराजसःसात्विकइति॥तत्रतामसाज्जडानिभूतसूक्ष्माणिजायंतेराजसाद्बुद्धिमुखानिदशेंद्रियाणिसात्विकान्मनइंद्रियदेवाश्चतेषांलयश्चतत्तदहंकारेतत्रभूतसूक्ष्माणामिंद्रियाणांचसन्निकर्षेलयस्थानंतामसंराजसंचमनोमयंदे

सभूतसूक्ष्मेंद्रियसन्निकर्षंमनोमयंदेवमयंविकार्यं॥संसाद्यगत्यासहतेनयातिविज्ञानतत्वंगुणसन्निरोधं॥३०॥तेनात्मनात्मानमुपैतिशांतमानंदमानंदमयोवसाने॥एतांगतिंभागवतींगतोयःसवैपुनर्नेहविषज्जतेंग॥३१॥ ॥ ॥

वमयंचसात्विकंप्राप्यगत्याएवंगमनेनतेनाहंकारेणसहविज्ञानतत्वंमहत्तत्वंयाति॥ततःगुणानांसन्निरोधोलयोयस्मिनतत्प्रधानंयाति॥३०॥तेनात्मनाप्रधानरूपेणानंदमयःसन्उपाधीनामवसानेशांतमविकृतमानंदंपरमात्मानमुपैति॥नविषज्जतेनावर्ततइत्यर्थः॥३१॥रामराम

श्रवणादिफलमभिनयेनाह ॥ पिबंतीति ॥ सतां आत्मनः ॥ आत्मत्वेन प्रकाशमानस्य कथैवामृतं विषयैर्विदू-
षितं मलिनीकृतं आशयं पुनंति शोधयंति ॥ तस्य चरणपद्मांतिकं श्रीविष्णुपदं व्रजंति ॥ ३७ ॥ इति द्वितीये
द्वितीयः ॥ तृतीये विष्णुभक्तेस्तु वैशिष्ट्यं प्रोच्यते मुनेः ॥ भक्त्युद्रेकेण तत्कर्मश्रवणादरइर्यते ॥ १ ॥ इ-
दानीमन्यदेवताभजनस्यापि पुत्रादिभजनवद्देवत्तुच्छफलत्वेन हेयत्वं वक्तुं पूर्वोक्तमनुवदति ॥

पिबंति ये भगवत आत्मनः सतां कथामृतं श्रवणपुटेषु संभृतं ॥ पुनंति ते विषयविदूषिताश-
यं व्रजंति तच्चरणसरोरुहांतिकं ॥ ३७ ॥ इति श्रीभा॰ द्वितीये॰ द्वितीयोध्यायः ॥ २ ॥ शुक उवाच
एवमेतन्निगदितं पृष्टवान्यद्भवान्मम ॥ नृणां यन्म्रियमाणानां मनुष्येषु मनीषिणां ॥ १ ॥
ब्रह्मवर्चसकामस्तु यजेत ब्रह्मणस्पतिं ॥ इंद्रमिंद्रियकामस्तु प्रजाकामः प्रजापतीन् ॥ २ ॥
देवीं मायां तु श्रीकामस्तेजस्कामो विभावसुं ॥ वसुकामो वसून्रुद्रान्वीर्यकामोथ वीर्यवान् ॥ ३ ॥

कामफलप्राप्त्यर्थमन्येषां वा सबलदेवानां भजनमाह २

एवमिति ॥ ममेति मां ॥ कदाचिद्दैवयोगेन मनुष्यत्वं प्राप्तेषु जीवेषु ये मनीषिणस्तेषां तत्रापि म्रियमा-
णानां तेषां विशेषत एवमेतद्धरिकथाश्रवणादिकं निगदितं विहितमित्यर्थः ॥ १ ॥ ब्रह्मणस्पतिं वे-
दपतिं ब्रह्माणं ॥ इंद्रियपाटवकामस्त्विंद्रं प्रजापतीन् दक्षादीन् ॥ २ ॥ मायां दुर्गां विभावसुं अग्निं ॥
वसुकामः धनार्थी ॥ वीर्यं प्रभावः तत्कामो वीर्यवान् सन् रुद्रान् यजेत ॥ ३ ॥ ॥

कुतएतदतआह ॥ भगवान्ब्रह्मा कूटस्थः निर्विकारः एकाग्रचित्तः सन्नितिपर्य्यः ॥ त्रिस्त्रीन्वारान्कार्त्स्न्येन साकल्येन
नब्रह्मवेदं अन्वीक्ष्यविचार्य यत आत्मनिहरौ रतिर्भवेत ॥ तदेवमनीषयाध्यवस्यत् निश्चितवान् ॥३४॥
ननुभक्तेर्यथा रतिर्भवति ॥ अननुभूतेतु भगवति कथं रतिः स्यात्तत्राह ॥ भगवान्लक्षितः दृष्टः कथं स्वात्म
नात्मनअंतर्यामितया ॥ कैर्दृश्यैर्बुध्यादिभिः तदेवद्रष्टारंदर्शयति ॥ दृश्यानांजडानांदर्शनंस्वप्रकाशंद्र

भगवान्ब्रह्मकार्त्स्न्येन त्रिरन्वीक्ष्यमनीषया ॥ तदध्यवस्यत्कूटस्थोरतिरात्मन्यतोभवेत् ॥३४॥
भगवान् सर्वभूतेषुलक्षितः स्वात्मनाहरिः ॥ दृश्यैर्बुद्ध्यादिभिर्द्रष्टालक्षणैरनुमापकैः ॥३५॥
तस्मात्सर्वात्मनाराजन्हरिः सर्वत्रसर्वदा ॥ श्रोतव्यः कीर्तितव्यश्चस्मर्तव्योभगवान्नृणां ॥३६॥

ष्टारंविनानघटतइत्यनुपपत्तिमुखेनलक्षणैः स्वप्रकाशांतर्यामिलक्षकैः ॥ तथाबुद्ध्यादीनिकर्तृप्रयो
ज्यानि ॥ करणत्वाद्वास्यादिवदितिव्याप्तिमुखेनानुमापकैः ॥ स्वतंत्रश्चकर्तेत्येवमीश्वरसिद्धिः ॥३५॥
यच्छ्रोतव्यमित्यादिप्रश्नोत्तरमुपसंहरति ॥ तस्मादिति ॥३६॥

एकस्य तुल्यार्थत्वे संयोगपृथक्त्वं २

अकामः एकांतभक्तः उक्तानुक्तसर्वकामो वा पुरुषं परं निरुपाधिं ॥१०॥ पूर्वोक्तनानादेवतायजनस्यापि संयो
गपृथक्त्वेन भक्तियोगफलत्वमाह ॥ एतावानिति ॥ इंद्रादीनपि यजतामिह तत्तद्यजने भागवतानां संगतो भ
गवत्यचलो भावो भक्तिर्भवतीति यत् ॥ एतावानेव निःश्रेयसस्य परमपुरुषार्थस्योदयः लाभः अन्यत्तु सर्व
तुच्छमित्यर्थः ॥११॥ भागवतसंगत इत्यनेन सूचितां हरिकथारतिं स्तौति ॥ ज्ञानमिति यत्र यासु कथासु

अकामः सर्वकामो वा मोक्षकाम उदारधीः ॥ तीव्रेण भक्तियोगेन यजेत पुरुषं परं ॥१०॥ एता
वानेव यजतामिह निःश्रेयसोदयः ॥ भगवत्यचलो भावो यद्भागवतसंगतः ॥११॥ ज्ञानं यदा
प्रतिनिवृत्तगुणोर्मिचक्रमात्मप्रसाद उत यत्र गुणेष्वसंगः ॥ कैवल्यसंमतपथस्त्वथ भक्ति
योगः को निर्वृतो हरिकथासु रतिं न कुर्यात् ॥१२॥ शौनक उवाच ॥ इत्यभिव्याहृतं राजा निश
म्य भरतर्षभः ॥ किमन्यत्पृष्टवान्भूयो वैयासकिमृषिं कविं ॥१३॥

ज्ञानं भवति कीदृशं आ सर्व
तः प्रतिनिवृत्तं उपरतं गुणोर्मीणां रागादीनां चक्रं समूहो यस्मात्तत् उत अनंतरं तद्धेतुरात्मप्रसादश्च
यत्र यासु मनःप्रसादहेतुः गुणेषु विषयेष्वसंगो वैराग्यं च उभयत्रेति पाठे इहामुत्र च गुणेष्वसंगः ॥ कैव
ल्यमित्येव सम्मतः पंथा यो भक्तियोगः निर्वृतः श्रवणसुखेन अन्यत्रानिवृत इति वा तासु हरिकथा
सु को रतिं न कुर्यात् ॥१२॥ अभिव्याहृतं उक्तं ॥ ऋषिं परब्रह्मदर्शिनं ॥ कविं शब्दब्रह्मनिष्णातं ॥१३॥

ऊर्द्ध्वरेतास्तपस्युग्रो नियताशी च संयमी शापानुग्रहयोः शक्तः सत्यसंधो भवेदृषिः १

अन्नाद्यंभोज्यंभक्ष्यंच॥अदितेःसुतानद्वादशादित्यानविशांदेशस्थप्रजानांस्वाधीनतामिच्छन्साध्यानय
जेत॥४॥इलांपृथ्वीप्रतिष्ठास्थानादप्रच्युतिःरोदसीद्यावाभूमी॥५॥अप्सराश्चासौउर्वशीचतां॥६॥यज्ञंय
ज्ञोपाधिंविष्णुं॥कोशोवसुसंचयः॥वसुकामइत्यत्रधनमात्रमितिभेदः॥दांपत्यमन्योन्यप्रीतिःतदेवार्थोय
स्यसः॥७॥धर्मार्थोधर्मकामःउत्तमश्लोकोपाधिंविष्णुं॥तंतुंतन्वनसंतानवृद्धिमिच्छन्रक्षाबाधानिवृत्तिः

अन्नाद्यकामस्त्वदितिंस्वर्गकामोदितेःसुतान्॥विश्वान्देवान्राज्यकामःसाध्यान्संसाधकोविशां॥४॥
आयुःकामोश्विनौदेवौपुष्टिकामइलांयजेत॥प्रतिष्ठाकामःपुरुषोरोदसीलोकमातरौ॥५॥रूपा
भिकामोगंधर्वान्स्त्रीकामोप्सरउर्वशीं॥आधिपत्यकामःसर्वेषांयजेतपरमेष्ठिनं॥६॥यज्ञंय
जेद्यशस्कामःकोशकामःप्रचेतसं॥विद्याकामस्तुगिरिशंदांपत्यार्थउमांसतीं॥७॥धर्मार्थ
उत्तमश्लोकंतंतुंतन्वन्पितॄन्यजेत्॥रक्षाकामःपुण्यजनानोजस्कामोमरुद्गणान्॥८॥राज्य
कामोमनून्देवान्निरृतिंत्वभिचरन्यजेत्॥कामकामोयजेत्सोममकामःपुरुषंपरं॥९॥

तत्कामस्तुःपुण्यजनानयक्षान्॥ओजोबलंतत्कामःमरुद्गणानदेवान॥८॥राज्यंराजत्वंतत्कामोमनून्देवा
न्मन्वंतरपालानराज्ञःकर्मीराज्यंतत्कामोविश्वानदेवानितिविशेषः॥अभिचरनशत्रुमरणमिच्छन्नि
र्ऋतिंराक्षसंकामकामःभोगेच्छुःअकामःवैराग्यकामःपुरुषंपरंप्रकृतिव्यतिरेकोपाधिंमीश्वरं॥९॥

तदेवाह॥ श्वादिभिः संस्तुतः सदृशो निरूपितः। यस्य कर्णपथं कदाचिदपि नागतः सः अवज्ञास्पदत्वात् श्वभिः
कश्मलविषयासक्तत्वाद्विड्वराहैर्ग्रामसूकरैः कंटकवत् दुःखदविषयासक्तत्वात् उष्ट्रैर्भारवाहित्वात् ख
रैस्तुल्य इत्यर्थः॥१९॥ तस्यांगानि च निःफलानीत्याह॥ बिले इति पंचभिः बतेति खेदे॥ न शृण्वतः अशृण्वतो
नरस्य ये कर्णपुटे ते बिले यथा रंध्रे न चेदुपगायति तस्य जिह्वा असती दुष्टा॥ दर्दुरो भेकस्तदीया जि

श्वविड्वराहोष्ट्रखरैः संस्तुतः पुरुषः पशुः॥ न यत्कर्णपथोपेतो जातु नाम गदाग्रजः॥१९॥ बिले
बतोरुक्रमविक्रमान्ये न शृण्वतः कर्णपुटे नरस्य॥ जिह्वाऽसती दार्दुरिकेव सूत न चोपगाय-
त्युरुगायगाथाः॥२०॥ भारः परं पट्टकिरीटजुष्टमप्युत्तमांगं न नमेन्मुकुंदं॥ शावौ करौ नो कुरु
तः सपर्यां हरेर्लसत्कांचनकंकणौ वा॥२१॥ बर्हायिते ते नयने नराणां लिंगानि विष्णोर्न निरीक्ष
ताये॥ पादौ नृणां तौ द्रुमजन्मभाजौ क्षेत्राणि नानुव्रजतो हरेर्यौ॥२२॥ ॥ ॥

ह्वेव॥२०॥ पट्टवस्त्रोष्णीषेण॥ किरीटेन च जुष्टमपि शिरोपदि न नमेत्तर्हि केवलं भारतएव॥ शवौ मृ
तकः॥ तत्करतुल्यौ लसती कांचनकंकणौ ययोस्तौ अपि व्यर्थौ वा शवः॥२१॥ येन पने विष्णोर्मूर्तीर्न निरीक्ष
ते ते बर्हापितेम पूर पिच्छनेत्रतुल्ये द्रुमवज्जन्म भजत इति तथा वृक्षमूलतुल्यावित्यर्थः॥२२॥ रामराम

अवाेच्यायांहेतुः। हरिकथा एव उदर्कः उत्तरफलं यासुताः कथाः सतां भागवतानां सदसि सभायां स्युः ॥१४॥ एत
त्प्रपंचयति स वा इति द्वाभ्यां कृष्णस्य पूजादिरूपां क्रीडां यः स्वीकृतवान् ॥१५॥ उरुगायस्य गुणैरुदाराः महत्यः
कथाः स्युः ॥१६॥ किं च ॥ वृथैव वर्तमानमायुर्हरिकथया सफलं कुर्वित्याशयेनाह ॥ त्रिभिः आयुरिति ॥ असौ
सूर्य उद्यन् उद्गच्छन् अस्तमदर्शनं च यन् गच्छन् यत् येन क्षणो नीतः तस्य आयुः ऋते वर्जयित्वा वृथैव ॥ २

एतच्छुश्रुषतां विद्वन् सूत नोर्हसि भाषितुं ॥ कथा हरिकथोदर्काः सतां स्युः सदसि ध्रुवं ॥१४॥ स वै
भागवतो राजा पांडवेयो महारथः ॥ बालक्रीडनकैः क्रीडन् कृष्णक्रीडां य आददे ॥१५॥ वैयास
किश्च भगवान् वासुदेवपरायणः ॥ उरुगायगुणोदाराः सतां स्युर्हि समागमे ॥१६॥ आयुर्ह
रति वै पुंसामुद्यन्नस्तं च यन्नसौ ॥ तस्यर्ते यत्क्षणो नीत उत्तमश्लोकवार्तया ॥१७॥ तरवः किं
न जीवंति भस्त्राः किं न श्वसंत्युत ॥ न खादंति न मेहंति किं ग्रामपशवोऽपरे ॥१८॥

हरति ॥१७॥ ननु जीवनमेव तेषामापुंषः फलमस्तीति त्याह ॥ तरव इति ॥ ननु तेषां श्वासो नास्ति ॥ तर्हि
भस्त्राः चर्मकोशाः ननु तासामाहारादिकं नास्ति ॥ तत्राह ॥ न खादंति नाश्नंति ॥ न मेहंति रेतःसेकं मै
थुनं न कुर्वंति किं ॥ उत अपि नराकारं पशुमत्वाह ॥ अपरे इति ॥१८॥ ॥

भा॰ द्वि॰ इममेवार्थं हरिलीलालक्षणं ॥ ३ ॥ संस्थां मृत्युं त्रैवर्गिकं धर्मार्थकामप्रधानं ॥ संन्यस्य त्यक्त्वा आत्मभावं पर
१६ मप्रेमाणं भगवदात्मत्वं गतः प्राप्तः सन् पप्रच्छ ॥ ४ ॥ मह्यं मम तमोऽज्ञानं नश्यति तव कथयतः सतः ॥

पप्रच्छ चेममेवार्थं यन्मां पृच्छथ सत्तमाः ॥ कृष्णानुभावश्रवणे श्रद्दधानो महामनाः ॥ ३ ॥ संस्थां
विज्ञाय संन्यस्य कर्म त्रैवर्गिकं च यत् ॥ वासुदेवे भगवति आत्मभावं दृढं गतः ॥ ४ ॥ राजोवाच
16 समीचीनं वचो ब्रह्मन् सर्वज्ञस्य तवानघ ॥ तमो विशीर्यते मह्यं हरेः कथयतः कथां ॥ ५ ॥
भूय एव विवित्सामि भगवानात्ममायया ॥ यथेदं सृजते विश्वं दुर्विभाव्यमधीश्वरैः ॥ ६ ॥ य
था गोपायति विभुर्यथा संयच्छते पुनः ॥ यां यां शक्तिमुपाश्रित्य पुरुशक्तिः परः पुमान् ॥ आत्मा
नं क्रीडयन् क्रीडन् करोति विकरोति च ॥ ७ ॥ नूनं भगवतो ब्रह्मन् हरेरद्भुतकर्मणः ॥ दुर्विभा
व्यमिवाभाति कविभिश्चापि चेष्टितं ॥ ८ ॥ यथा गुणांस्तु प्रकृतेर्युगपत्क्रमशोऽपि वा ॥ बिभर्ति
भूरिशस्त्वेकः कुर्वन् कर्माणि जन्मभिः ॥ ९ ॥

तत् समीचीनं ॥ ५ ॥ पुनश्च वेदितुमिच्छामि ॥ इदं दुर्विभाव्यं ॥ अवितर्क्यं विश्वं यथा सृजति ॥ ६ ॥ गोपायति पालय राम॰
ति संयच्छते संहरते ॥ पुरुशक्तिः बहुशक्तिमान् क्रीडन् यथा करोति ॥ आत्मानं ब्रह्मादिरूपिणं क्रीडयन् १६
विकरोति विविधं करोति ॥ ७ ॥ एकः पुरुषरूपेण युगपज्जन्मभिः ॥ ब्रह्माद्यवतारैः क्रमशो वा यथा प्रकृतेर्गुणान् गृह्णाति
॥ ९ ॥

नाभिलभेत अभितो न स्पृशेत न धारयेत ॥ श्रीविष्णुपद्याः श्रीविष्णुपदलग्नायाः न वेदेति अवघ्राय नाभिनंदे
दित्यर्थः ॥ १३ ॥ अश्मवत्सारो बलं काठिन्यं यस्य विक्रियालक्षणमाह ॥ अथेति गात्ररुहेषु रोमसु हर्षः उद्ग
मः ॥ २४ ॥ यस्माद्भक्तस्य सर्वमेतद्वाचं मनसोऽनुकूलं च प्रियं ब्रूषे ॥ अथ अतः साधुपृष्टः सन् वैयासकिः न

जीवञ्छवो भागवतांघ्रिरेणुं न जातु मर्त्योऽभिलभेत यस्तु ॥ श्रीविष्णुपद्या मनुजस्तुलस्याः श्वसन्
शवो यस्तु न वेद गंधं ॥ २३ ॥ तदश्मसारं हृदयं बतेदं यद्गृह्यमाणैर्हरिनामधेयैः ॥ न विक्रियेताथ
यदा विकारो नेत्रे जलं गात्ररुहेषु हर्षः ॥ २४ ॥ अथाभिधेह्यंग मनोऽनुकूलं प्रभाषसे भागवतप्रधा
नः यदाह वैयासकिरात्मविद्याविशारदो नृपतिं साधु पृष्टः ॥ २५ ॥ इति श्रीभागवते महापुराणे
द्वितीयस्कंधे तृतीयोऽध्यायः ॥ ३ ॥ सूत उवाच ॥ वैयासकेरिति वचस्तत्त्वनिश्चयमात्मनः ॥ उपधा
र्य मतिं कृष्णे औत्तरेयः सतीं व्यधात् ॥ १ ॥ आत्मजायासुतागारपशुद्रविणबंधुषु ॥ राज्ये चाविक
लेनित्यं निरूढां ममतां जहौ ॥ २ ॥

पतिं प्रति यदाह ॥ तदभिधेहीति ॥ २५ ॥ द्वितीये तृतीयः ॥ तुर्ये परीक्षिता
प्रश्नं सृष्ट्यादि हरिचेष्टितं ॥ शुकेन ब्रह्मतत्पुत्रसंवादेनोपवर्ण्यते ॥ १ ॥ राज्ञः प्रश्नं कथयितुं तस्य प्राकृत
नीं स्थितिमाह चतुर्भिः वैयासकेः शुकस्य इति एवंभूत आत्मनस्तत्त्वस्य निश्चयो यस्मात्तद्वचः उपधार्य
आकलय्य सतीं कृष्णे एवं सेव्यः नान्य इत्येवंभूतां ॥ १ ॥ आत्मादेः पशवो गजादयः ॥ २ ॥ ॥

सात्वतांभक्तानांस्त्वृषभायपालकाय।कुयोगिनांभक्तिहीनानांविदूराकाष्ठादिगपियस्यदुर्ज्ञेयायेत्यर्थः।त्तदे
वंवैषम्यप्रसक्तीतावपिनिर्द्दोषत्वायाऽचिंत्यमैश्वर्यमाह॥निरस्तंसाम्यंअतिशयश्चयस्मात्॥यदपेक्षया
अन्यस्यसाम्यमतिशयश्चनास्ति।तेनराधसास्वैश्वर्येणस्वधामनिस्वस्वरूपेब्रह्मणिरममाणाय॥१४॥

नमोनमस्तेस्त्वृषभायसात्वतांविदूरकाष्ठायमुहुःकुयोगिनां॥निरस्तसाम्यातिशयेनराध
सास्वधामनिब्रह्मणिरंस्यतेनमः॥१४॥यत्कीर्त्तनंयत्स्मरणंयदीक्षणंयद्वंदनंयच्छ्रवणंयद
र्हणं॥लोकस्यसद्योविधुनोतिकल्मषंतस्मैसुभद्रश्रवसेनमोनमः॥१५॥विचक्षणायच्चरणोप
सादनात्संगंव्युदस्योभयतोऽन्तरात्मनः॥विंदंतिहिब्रह्मगतिंगतक्लमास्तस्मैसुभद्रश्रवसेन
मोनमः॥१६॥

सर्व्वसाधनेभ्योभक्तेःश्रैष्ठ्यंअनुस्मरन्प्रणमति॥यत्कीर्त्तनमितिद्वाभ्यां॥अर्हणंपूजनंसुभद्रंमंगलं
श्रवःयशोयस्यतस्मै॥१५॥विचक्षणाःविवेकिनःयस्यचरणयोरुपसादनात्॥उपसत्तेर्भजनात्॥
अंतरात्मनोमनसउभयत्रइहचपरत्रचसंगंव्युदस्यनिरस्यगतक्लमाःप्रयासरहिताः॥१६॥

विचिकित्सितं संदिग्धं ॥ शाब्दे ब्रह्मणि विचारेण निष्णातः परस्मिन्ननुभवेन ॥ १० ॥ उपामंत्रितः प्रार्थितः ॥ उपचक्र
मे देवतागुरुनमस्कारादिरूपमुपक्रमं कृतवानित्यर्थः ॥ ११ ॥ तदेवाह त्रयोदशभिः ॥ परस्मै सर्वोत्तमाय तत्र हे
तुः ॥ भूयसे अपरिमितमहिम्ने तद्दर्शयति सतः प्रपंचस्य उद्भवादिषु निमित्तभूतया लीलया गृहीतं ब्रह्मा
दिरूपेण रज आदिशक्तित्रितयं येन तस्मै अंतर्भवाय अंतर्यामिणे ॥ अत एव सर्वोत्तरत्वादनुपलक्ष्यं वर्त्म

विचिकित्सितमेतन्मे ब्रवीतु भगवान्यथा ॥ शाब्दे ब्रह्मणि निष्णातः परस्मिन्भगवान्खलु ॥ १० ॥
सूत उवाच ॥ इत्युपामंत्रितो राज्ञा गुणानुकथने हरेः ॥ हृषीकेशमनुस्मृत्य प्रतिवक्तुं प्रचक्रमे ॥ ११ ॥
श्रीशुक उवाच ॥ नमः परस्मै पुरुषाय भूयसे सदुद्भवस्थाननिरोधलीलया ॥ गृहीतशक्तित्रितया
य देहिनामंतर्भवायानुपलक्ष्यवर्त्मने ॥ १२ ॥ भूयो नमः सद्वृजिनच्छिदेऽसतामसंभवायाखिल
सत्वमूर्त्तये ॥ पुंसां पुनः पारमहंस्य आश्रमे व्यवस्थितानामनुमृग्यदाशुषे ॥ १३ ॥ ॥ ॥

२ पस्य ॥ १२ ॥ विचित्रफलदातृत्वमनुस्मृत्य पुनः प्रणमति ॥ भूयः पुनश्च नमः ॥ सतां धर्मवर्त्तिनां वृजिनच्छिदे दुःख
हंत्रे ॥ असतां अधर्मशीलानां असंभवाय अनुद्भवहेतवे ॥ अखिलसत्वमूर्त्तये तत्तद्देवादिरूपेण तत्त
त्फलदायेत्यर्थः ॥ समग्रसत्वमूर्त्तये इति वा ॥ पुनरपि पूर्वोक्तोभयवैलक्षण्यमाह ॥ पारमहंस्ये प्रत्यक्नि
ष्ठारूपे आश्रमे व्यवस्थितानां पुंसां अनुमृग्यं अतन्निरसनेन पुनः पुनर्मार्गणीयं यदात्मतत्त्वं तस्य दाशुषे दात्रे ॥ १३ ॥

भा· द्वि· १८ सर्वपालकत्वमनुस्मरन्नाह॥ श्रिय इति॥ गतिश्च सर्वापत्सु रक्षकः॥२०॥ ज्ञानप्रदत्वमनुस्मरन्नाह द्वाभ्यां
यस्यांघ्रेरनुध्यानमेव समाधिस्तेन धौतया शोधितया यथारुचं रुच्यनुसारेण सगुणनिर्गुणादिभे
दैः॥ यद्वा रुक् प्रतिभा यथामतीत्यर्थः॥२१॥ किंच पुराकल्पादौ अजस्य हृदि सती स्वविषयां स्मृतिं वि

18

श्रियः पतिर्यज्ञपतिः प्रजापतिर्धियां पतिर्लोकपतिर्धरापतिः॥ पतिर्गतिश्चांधकवृष्णि
सात्वतां प्रसीदतां मे भगवान्सतां पतिः॥२०॥ पदं यदंघ्र्यनुध्यानसमाधिधौतया धियानुपश्यंति
हि तत्वमात्मनः॥ वदंति चैतत्कवयो यथारुचं स मे मुकुंदो भगवान्प्रसीदतां॥२१॥ प्रचोदि
ता येन पुरा सरस्वती वितन्वताजस्य सतीं स्मृतिं हृदि॥ स्वलक्षणा प्रादुरभूत्किलास्यतः स
मे ऋषीणामृषभः प्रसीदतां॥२२॥ भूतैर्महद्भिर्य इमाः पुरो विभुर्निर्माय शेते यदमूषु पूरु
षः॥ भुंक्ते गुणान्षोडश षोडशात्मकः सोलंकृषीष्ट भगवान्वचांसि मे॥२३॥

तन्वता येन प्रचोदिता सती आस्यतः मुखतः किल प्रादुर्भूता॥ स्वानि असाधारणानि लक्षणानि शि
क्षाद्युक्तानि यस्याः सा॥ ऋषीणां ज्ञानप्रदानां ऋषभः श्रेष्ठः॥२२॥ इदानीं स्ववाचं श्रोतृजनाह्लादिनीं
शृंगारकरणादिशोभां प्रार्थयते भूतैरिति॥ स मे वचांसि अलंकृषीष्ट अलंकरोतु॥ अन्यस्य च राम·
सामन्येनालंकारासंभवमाशंक्य तस्यांतर्यामितामाविष्करोति यो॥ ॥ ॥ १८

भक्तिं विना सर्वसाधनवैफल्यं दर्शयन्नमति तपस्विन इति मनस्विनो योगिनः सुमंगलाः सदाचाराः यस्मिन्
तपआद्यर्पणं विना सुभद्रश्रवसद्रूति अस्याव न्निर्यशः श्रवणादेः प्राधान्यज्ञापनाय ॥१७॥ भक्तेः परमशुद्धि
हेतुत्वं दर्शयन्नाह ॥ किरातादयो ये पापजातयः अन्ये च ये कर्मतः पापरूपास्ते यदुपाश्रया ॥ भागवताः त

तपस्विनो दानपरा यशस्विनो मनस्विनो मंत्रविदः सुमंगला ॥ क्षेमं न विंदंति विना यदर्पणं त
स्मै सुभद्रश्रवसे नमो नमः ॥१७॥ किरातहूणांध्रपुलिंदपुल्कसा आभीरकंका यवनाः खसादयः
येऽन्ये च पापा यदुपाश्रयाश्रयाः शुध्यंति तस्मै प्रभविष्णवे नमः ॥१८॥ स एष आत्मात्मवतामधी
श्वरस्त्रयीमयो धर्ममयस्तपोमयः ॥ गतव्यलीकैरजशंकरादिभिर्वितर्क्यलिंगो भगवान्प्रसीदतां ॥
॥१९॥

दाश्रयाः संतः शुध्यंति ॥ असंभावनाशंकां परिहरति ॥ प्रभविष्णवे प्रभवनशीलायेति ॥१८॥ सर्वोपास्यत्व
मनुस्मरन्प्रार्थयते ॥ स एष आत्मवतां धीराणां मात्मा आत्मत्वेनोपास्य इत्यर्थः ॥ त्रयीमयत्वादिविशेषणैः
तत्तन्मार्गेणोपास्यत्वं विवक्षितं गतव्यलीकैर्निष्कपटैर्भक्तैर्वितर्क्यं अत्याश्चर्येण चिह्नानि लिंगं स्वरूपं यस्य स
प्रसीदतु ॥१९॥

19

उपलक्षणमेतं विश्वमेवात्मज्ञानसाधनं ॥ अतस्तद्विशेषं पृच्छति ॥ यद्रूपं येन रूपेण तेन प्रकाशते ॥ यदधि-
ष्ठानं यदाश्रयं यतः येन सृष्टं यत्संस्थं यस्मिन् लीयते ॥ यत्परं यदधीनं ॥ यच्चेति यदात्मकं स्वतः सत्कार-
णतो वेत्यर्थः तस्य तत्त्वं याथार्थ्यं तत्त्वतो वद २ न जानामीति न च वक्तव्यमित्याह सर्वं ह्येतमिति भूतं जातं
भव्यं जनिष्यमाणं भवत् जायमानं ॥ तेषां प्रभुर्यतः अतः विशिष्टेन ज्ञानेनावसितं निश्चितं ॥ ३ ॥ आ-

त्वं कुरे श्रमत्वं च
तन[illegible]लं वां चक्र
मलत्वं ४ व इति के
मस्य कमत् २

यद्रूपं यदधिष्ठानं यतः सृष्टमिदं प्रभो ॥ यत्संस्थं यत्परं यच्च तत्तत्त्वं वद तत्त्वतः ॥ २ ॥ सर्वं ह्ये-
तद्भवान्वेद भूतभव्यभवत्प्रभुः ॥ करामलकवद्विश्वं विज्ञानावसितं तव ॥ ३ ॥ यद्विज्ञा-
नो यदाधारो यत्परस्त्वं यदात्मकः ॥ एकः सृजसि भूतानि भूतैरेवात्ममायया ॥ ४ ॥ आत्म-
न् भावयसे तानि न पराभावयन्स्वयं ॥ आत्मशक्तिमवष्टभ्य ऊर्णनाभिरिवाक्लमः ॥ ५ ॥

त्वामिदं ॥ आदौ तावत् त्वामेव कथयेत्याह ॥ यतो विज्ञानं यस्य कस्त्वं विज्ञानद इत्यर्थः ॥ यदाधा-
रः क[illegible] स्तवाश्रयः ॥ यत्परः यदधीनः यदात्मकः यत्स्वरूपः ॥ मम तु त्वमेव स्वतंत्रः ॥ परमेश्वर इ-
२ ति बुद्धिस्तवत प्रश्नो ॥ ननु परशंकया पृच्छामीत्याह सार्द्धैश्चतुर्भिः एकः असहायः ॥ ४ ॥ आत्म-
नि भावयसे पालयसि ॥ स्वयमेव पराभवमप्रापयन् ॥ अक्लमः श्रमरहितः ॥ यथोर्णनाभिरात्मन
एव शक्तिमवष्टभ्य सृजति तद्वत् ॥ ५ ॥

महद्भिर्भूतैरिमाःपुरःशरीराणिसृष्ट्वाअमूषुपूर्ष्वंतर्यामितयाशेतेवसति॥अत्रपुरुषसमाख्यांप्रमाण
यति॥यद्यस्मात्पुरुषइति॥अतएवयःएकादशेंद्रियपंचभूतरूपान्षोडशगुणान्कलाः॥भुंक्तेप्रकाशय
तिपालयतीतिवा॥नदात्वात्मनेपदमार्षं॥अत्रहेतुः॥यतःषोडशानामात्माचेतयितास्वार्थेकः॥नत्वत्रजीव
त्वमुच्यतेप्रार्थनाविरोधात्॥२३॥श्रीव्यासंनमस्करोति॥सोस्माभक्ताःयस्यमुखांबुरुहेआसवोमकरंदः

नमस्तस्मैभगवतेवासुदेवायवेधसे॥पपुर्ज्ञानमयंसौम्यायन्मुखांबुरुहासवं॥२४॥ए
तदेवात्मभूराजन्नारदायविपृच्छते॥वेदगर्भोभ्यधात्साक्षात्यदाहहरिरात्मनः॥२५॥
इतिश्रीभागवतेमहापुराणेद्वितीयस्कंधेचतुर्थोध्यायः॥४॥श्रीनारदउवाच॥देवदे
वनमस्तेस्तुभूतभावनपूर्वज॥तद्विजानीहियज्ज्ञानमात्मतत्वनिदर्शनं॥१॥रामरा

२

तं॥२४॥इदानींप्रश्नस्योत्तरतयाब्रह्मनारदसंवादंप्रस्तौति॥एतदिति॥उत्पत्तिसमयएववेदागर्भो
यस्य॥साक्षाद्धरिर्यदाह॥२५॥द्वितीयेचतुर्थे॥पंचमेनारदेनाथपृष्टःसृष्ट्यादिवत्स्वजः॥हरेर्लीलां
विराट्सृष्टिंकालकर्मादिशक्तिभिः॥नारदायविपृच्छतेवेदगर्भोभ्यधा॥दित्युक्तं॥तत्रनारदप्र
श्नमाह॥देवदेवेति॥हेभूतभावनअतएवसर्वेषांपूर्वजअग्रजनादेज्ञायतेनेनेतिज्ञानंतत्साधनंयत्तत
द्विजानीहिविशेषेणज्ञापयेत्यर्थः॥कथंभूतंआत्मतत्वंनितरांदृश्यतेयेनतत्॥१॥ ॥

भा·द्वि· तर्हिकोसावीश्वरइत्यपेक्षायांभगवान्नमस्कुर्वन्नेवतंकथयतिद्विभिः॥येनस्वप्रकाशेनरोचितंप्रकाशित
२० मेवप्रकाशयामिसृष्टमिवव्यक्तंकरोमियथार्कादयश्चेतत्प्रकाश्यमेवप्रकाशयंतितथाचश्रुतिः
नतत्रसूर्योभातिनचंद्रतारकं॥नेमाविद्युतोभांतिकुतोयमग्निः॥तमेवभांतमनुभातिसर्वंतस्यभासा
सर्वमिदंविभातीति॥११॥तस्मैनमोधीमहियस्यमाययामोहिताः॥संतोयुष्मदादयोमांजगद्गुरुंजग

20

येनस्वरोचिषाविश्वंरोचितंरोचयाम्यहं॥यथार्कोग्निर्यथासोमोयथर्क्षग्रहतारकाः॥
११ तस्मैनमोभगवतेवासुदेवायधीमहि॥यन्माययादुर्जययामांब्रुवंतिजगद्गुरुं॥१२॥
विलज्जमानयायस्यस्थातुमीक्षापथेमुया॥विमोहिताविकत्थंतेममाहमितिदुर्धियः॥१३॥

कर्त्तारंवदंतितस्मै॥११॥यन्माययेतिमायासंबंधोक्तैःस्तस्यादुर्जयत्वोक्तेश्चतस्यापिकिमस्तिसंसा
रंनैवेत्याहमत्कपटमसौजानातीतियस्यदृष्टिपथेस्थातुंविलज्जमानयेवतस्मिन्स्वकार्यम
कुर्वत्याऽमुयामायया विमोहिताअस्मदादयोदुर्धियः॥अविद्यावतज्ञानाएवकेवलंविकत्थंतेश्ला राम·
घंते॥अनेनस्वरूपमित्यस्यप्रश्नस्योत्तरमुक्तंभवति॥१३॥ २०

तस्मान् अहं तु अस्मिन् विश्वस्मिन् परं उत्तमं ॥ अपरं अधमं सम मं मध्यमं च ॥ तत्रापि नाममनुष्यादि रूपं द्विपदत्वादि
गुणः शुक्लत्वादिर्भिर्भाव्यं साध्यं तत्रापि सदसत् स्थूलं सूक्ष्मं च ॥ किंचिदप्यन्यतो न वेद ॥ किंतु त्वत्त एव सर्वं भवती
ति मन्ये ॥ ६ ॥ स तथाविधोपि भवान् तपो यच्चरदिति यत् तेन नोस्मान् खेदयसे मोहयसि ॥ यतः पराशंकां ईश्वरां
तरशंकां प्रयच्छसि ॥ ७ ॥ यथैवाहं त्वयानुशासितः शिक्षितः सन् बुध्ये बुध्येयं तथा विशेषेण विज्ञापय ॥ ८ ॥ प्र
श्नमभिनंदति हे वत्स पुत्र तव इदं विचिकित्सितं संदेहः ॥ तत्पूर्वकः प्रश्नोयं सम्यगित्यर्थः ॥ यतः कारुणिक

नाहं वेद परं ह्यस्मिन् नापरं न समं विभो ॥ नामरूपगुणैर्भाव्यं सदसत्किंचिदन्यतः ॥ ६ ॥ स भवानच
रद्घोरं यत्तपः सुसमाहितः ॥ तेन खेदयसे नस्त्वं पराशंकां प्रयच्छसि ॥ ७ ॥ एतन्मे पृच्छतः सर्वं सर्वज्ञ
सकलेश्वर ॥ विजानीहि यथैवेदमहं बुध्येनुशासितः ॥ ८ ॥ ब्रह्मोवाच ॥ सम्यक्कारुणिकस्येदं व
त्स ते विचिकित्सितं ॥ यदहं चोदितः सौम्य भगवद्वीर्यदर्शने ॥ ९ ॥ नानृतं तव तच्चापि यथा मां प्रब्रवी
षि भो ॥ अविज्ञाय परं मत्त एतावत्त्वं यतो हि मे ॥ १० ॥

स्यतवायं प्रश्नः ॥ अत्र हेतुः यद्यतः परमधर्मे भगवद्वी
र्यप्रकाशने प्रवर्तितोस्मि ॥ अतस्त्वं जिज्ञासुरपि मयि कृपामेव कृतवानित्यर्थः ॥ ९ ॥ ननु त्वमेव भगवानितु त्वं हि
त्वया एकः सृजसि भूतानीत्यादिना सत्यं यथा मामीश्वरत्वेन प्रभाषसे तदपि तव भाषणं नानृतं यतः कार
णात् ॥ एतावत्प्रभावस्य प्रभावः एतावत्त्वं मे अस्ति ॥ किंतु मत्तः परमीश्वरमविज्ञाय त्वं ब्रूषे अतः सादृश्यात्त्वेयं
भ्रांतिः न तु बुद्धिपूर्वमनृतमित्यर्थः पतईश्वरान्मम एतावत्त्वं तमविज्ञायेति वान्वयः ॥ १० ॥ ॥

भा॰द्वि॰ २१

21

ननुकुतोयंजीवेश्वरविभागः यतस्त्वंप्रेर्यः सचप्रेरकः स्यादित्यपेक्षायांजीवेश्वरविभागहेतुमाह॥ त्रिभिः सत्वमितिनिर्गुणस्यापीश्वरस्यैतेत्रयोगुणाबध्नंतीत्युत्तरेणान्वयः॥ कथंभूताः तेनैवस्वातंत्र्येणस्थित्याद्यर्थंमाययागृहीताः॥१८॥ वस्तुतः सर्वदामुक्तमपिमायिनंमायाविषयंपुरुषंजीवंबध्नंति॥ कार्यमधिभूतंकारणमध्यात्मं॥ कर्त्ताधिदैवतंतेषांभावस्तत्वंतस्मिन्द्रव्यंमहाभूतानि

सत्वंरजस्तमइतिनिर्गुणस्यगुणास्त्रयः॥ स्थितिसर्गनिरोधेषुगृहीतामाययाविभो॥१८॥
कार्यकारणकर्तृत्वेद्रव्यज्ञानक्रियाश्रयाः॥ बध्नंतिनित्यदामुक्तंमायिनंपुरुषंगुणाः॥१९॥
सएषभगवान्लिंगैस्त्रिभिरेभिरधोक्षजः॥ स्वलक्षितगतिर्ब्रह्मन्सर्वेषांममचेश्वरः॥२०॥
कालंकर्मस्वभावंचमायेशोमाययास्वया॥ आत्मन्यदृच्छयाप्राप्तंविबुभूषुरुपाददे॥२१॥

ज्ञानशब्देनदेवताः क्रियाइंद्रियाणि॥ तदाश्रयाः तेषांकारणभूताः तत्तदभिमानेनबध्नंति॥१९॥ अतः स एवंस्वरूपमायः एभिर्गुणैर्लिंगैः जीवानामावरकैरुपाधिभिः सुषु अलक्षितागतिस्तत्वंयस्यसः॥ स्वैर्भक्तैरेवलक्षितागतिर्यस्येति वा॥२०॥ तस्यसर्गप्रकारमाहकालमिति। कर्मजीवादृष्टं॥ विबुभूषुः विविधंभवितुमिच्छन्॥२१॥

राम॰ २१

तदेवंस्वस्मादन्यंपरमेश्वरंनिरूप्येदानीयदधिष्ठानमित्यादिनवश्लोकानांसएवाधिष्ठानादिकंसर्वमित्युत्तरंव
क्तुंतद्व्यतिरेकेणान्यस्यासत्वमाह॥इदमितिइदंमहाभूतानिउपादानरूपाणिकर्म्मजन्मनिमित्तंका
लस्तत्क्षोभकः॥स्वभावस्तत्परिणामहेतुः॥जीवोभोक्तावासुदेवात्परोन्योर्थोनास्ति॥कारणव्यतिरेकात्कार्य
स्यकार्यंहिकारणमपेक्षतेनानारूपत्वात्कार्यस्य॥१४॥तत्रपंचयतिद्वाभ्यां॥नारायणःपरःकारणंयेषांते

इदंकर्म्मचकालश्चस्वभावोजीवएवच॥वासुदेवात्परोब्रह्मन्नचान्योर्थोस्तितत्वतः॥१४॥
नारायणपरावेदादेवानारायणांगजाः॥नारायणपरालोकानारायणपरामखाः॥१५॥नाराय
णपरोयोगोनारायणपरंतपः॥नारायणपरंज्ञानंनारायणपरागतिः॥१६॥तस्यापिद्रष्टुरी
शस्यकूटस्थस्याखिलात्मनः॥सृज्यंसृजामिसृष्टोहमीक्षयैवाभिचोदितः॥१७॥

अनेनैवशास्त्रयोनित्वप्रतिपादनेनेश्वरेप्रमाणंसर्वज्ञत्वादिकंचोक्तं॥देवाश्चतदंगाज्जाताःअतो
दा नतद्व्यतिरिक्ताःलोकाःस्वर्गादयस्तेनंदांशामखास्तत्साधनभूताः॥१५॥योगःप्राणायामादिःतपस्त
त्साध्यंचित्तैकाग्र्यंज्ञानंतत्साध्यं॥गतिस्तत्फलं॥अनेनैवसर्व्वंतदधीनमित्युक्तं॥१६॥तर्हित्वंकिंकरोषी
त्यपेक्षायामाह॥तस्यसृज्यमर्पितेनस्रष्टोहंसृजामि॥ईक्षयाकटाक्षेणतत्रहेतवःद्रष्टुरित्यादयः॥१७॥

भूतादेरितितामसस्यविशेषणं ॥ ननुतामसात्प्रथमंशब्दोभवतीतिप्रसिद्धंसत्यं ॥ सतुतस्यनभसोमा
त्रासत्त्वंरूपंगुणश्चअसाधारणःव्यावर्त्तकोधर्मः ॥ शब्दद्वारानभउत्पद्यतइत्यर्थः ॥ एवमेवस्पर्शा
दिष्वपिद्रष्टव्यं ॥ शब्दस्यलक्षणं ॥ लिंगमितिकुड्यांघंतरितेनकेनचिदुक्तेगजोयंगजइत्युक्तेयोगज
इत्यायश्चतेनद्रष्टागजःतपोर्लिंगबोधकंलिंगविशेषणात्वाद्रूयकशब्दस्यषंढत्वं ॥ २५ ॥ परस्यनभ

तामसादपिभूतादेर्विकुर्वाणादभून्नभः तस्यमात्रागुणःशब्दोलिंगंयद्द्रष्टृदृश्ययोः ॥ २५ ॥
नभसोथविकुर्वाणादभूत्स्पर्शगुणोनिलः ॥ परान्वयाच्छब्दवांश्चप्राणओजःसहोबलं ॥ २६ ॥
वायोरपिविकुर्वाणात्कालकर्मस्वभावतः ॥ उदपद्यततेजोवैरूपवत्स्पर्शशब्दवत् ॥ २७ ॥
तेजसस्तुविकुर्वाणादासीदंभोरसात्मकं ॥ रूपवत्स्पर्शवच्चांभोघोषवच्चपरान्वयात् ॥ २८ ॥

सःकारणत्वेनान्वयाच्छब्दवांश्चवायुः ॥ तस्यैवलक्षणंप्राणोदेहधारणं ॥ ओजःसहोबलानि ॥ इंद्रियमनःश
रीराणांपाटवानितेषांहेतुरित्यर्थः ॥ २६ ॥ स्वतोरूपवत्तेजःवायुनभसोःकारणभूतयोरन्वयात्स्पर्शश
ब्दवच्च ॥ एवमंभसःपृथिव्याश्चपरान्वयाधिक्यात्तद्गुणाधिक्यं ॥ २७ ॥ घोषःशब्दः ॥ २८ ॥ ॥

गुणानांव्यतिकरः क्षोभः साम्यत्यागः स्वभावतः परिणामो रूपांतरापत्तिः ॥ पुरुषः ईश्वरस्तेनाधिष्ठितत्वंत्रया
णां विशेषणं महतः महत्तत्वस्य ॥२२॥ विकुर्वाणात् विक्रियमाणात् ॥ तस्य च क्रियाज्ञानशक्तित्वात् त्रिगु
णत्वेपि रजःसत्वाभ्यामुपबृंहितत्वं ॥ अहंकारस्य त्वावरकत्वात्तमःप्रधानत्वं ॥ अतएवाहंकारकार्येषु

कालाद्गुणव्यतिकरः परिणामः स्वभावतः ॥ कर्मणो जन्म महतः पुरुषाधिष्ठितादभूत् ॥२२॥ म
हतस्तु विकुर्वाणाद्रजःसत्वोपबृंहितात् ॥ तमःप्रधानस्त्वभवद्द्रव्यज्ञानक्रियात्मकः ॥
॥२३॥ सोहंकार इति प्रोक्तो विकुर्वन्समभूत्त्रिधा ॥ वैकारिकस्तैजसश्च तामसश्चेति यद्भि
दा ॥ द्रव्यशक्तिः क्रियाशक्तिर्ज्ञानशक्तिरिति प्रभो ॥२४॥ राम ॥

मत्रोदेवताइ
याए २

तामसमाकाशादिकं बहु राजसं सात्विकं चाल्पं एवं तदुपाधिकेषु जीवेष्वपि तथैव तामसाधिक्यं ॥२३॥
स च विकुर्वन् रूपांतरं गच्छन् ॥ त्रैविध्यमेवाह ॥ वैकारिकः सात्विकः तैजसो राजसः ॥ यद्भिदा यस्य भेदः
द्रव्यशक्तिरित्यादीनि प्रातिलोम्येन त्रयाणां लक्षणानि द्रव्ये महाभूतारब्धे शक्तिर्यस्य ॥ क्रियासु इंद्रियेषु
शक्तिर्यस्य ॥ ज्ञानेषु देवेषु शक्तिर्यस्य हे प्रभो बोद्धुं शक्त ॥२४॥

तदासदसत्वंप्रधानगुणभावंउपादायस्वीकृत्यउभयंसमष्टिव्यष्ट्यात्मकंशरीरं॥३२॥कालकर्मस्वभावानधिष्ठायस्थितः॥जीवयतीतिजीवःपरमात्मा॥अजीवमचेतनंअजीवयत्चेतयतिस्म॥३३॥निर्भिद्यपृथक्कृत्यस्थितइत्यर्थः॥३४॥तदेवपर्वैर्लोकरचनामाह॥यस्येति॥कटिरितिऊरुमूलयोःपश्चाद्भागः॥

तदासंहत्यचान्योन्यंभगवच्छक्तिचोदिताः॥सदसत्वमुपादायचोभयंससृजुर्ह्यदः॥३२॥
वर्षपूगसहस्रांतेतदंडमुदकेशयं॥कालकर्मस्वभावस्थोजीवोजीवमजीवयत्॥३३॥
सएवपुरुषस्तस्मादंडंनिर्भिद्यनिर्गतः॥सहस्रोर्वंघ्रिबाह्वक्षःसहस्राननशीर्षवान्॥३४॥
यस्येहावयवैर्लोकान्कल्पयंतिमनीषिणः॥कट्यादिभिरधःसप्तसप्तोर्ध्वंजघनादिभिः॥३५॥
पुरुषस्यमुखंब्रह्मक्षत्रमेतस्यबाहवः॥ऊर्वोर्वैश्योभगवतःपद्भ्यांशूद्रोभ्यजायत॥३६॥भू
र्लोकःकल्पितःपद्भ्यांभुवर्लोकोस्यनाभितः॥हृदास्वर्लोकउरसामहर्लोकोमहात्मनः॥३७॥

जघनंपुरोभागः॥अधःसप्तलोकानतलादीन्॥ऊर्ध्वंभूरादीनसप्त॥३५॥वर्णानांततउत्पत्तिंदर्शयति
पुरुषस्येतिब्रह्मब्राह्मणाः॥मुखमितिकार्यकारणयोरभेदविवक्षयोक्तंबाहवइतिक्षत्रंक्षत्रियः
३६॥इदानीमुपासनार्थंलोककल्पनाभेदान्दर्शयन्॥सप्तलोकपक्षमाहद्वाभ्यांभूर्लोकःपातालमा
रभ्यपद्भ्यांकटिपर्यंताभ्यां॥३७॥

विशेषः पृथ्वी पृथिव्याश्च परान्वयाधिक्यात्तद्गुणाधिक्यं ॥२९॥ मनः शब्देनैव तदधिष्ठाता चंद्रोपि द्रष्टव्यः ॥ अन्ये
च दश देवा वैकारिकाः सात्विकाहंकारकार्याः तानाह ॥ दिशश्च वातश्च अर्कश्च प्रचेताश्च अश्विनौ च ए
ते पंच श्रोत्रत्वक्चक्षुर्जिह्वाघ्राणानामधिष्ठातारः ॥ वह्निश्च इंद्रश्च उपेंद्रश्च मित्रावरुणौ मित्रश्च प्रजा
पतिः एते पंच वाक्पाणिपादपायूपस्थानां ॥२९॥ यतो ज्ञानशक्तिर्बुद्धिः क्रियाशक्तिः प्राणश्च तैजसाहं

विशेषस्तु विकुर्वाणादंभसो गंधवानभूत् ॥ परान्वयाद्रसस्पर्शशब्दरूपगुणान्वितः ॥२९॥
वैकारिकान्मनो जज्ञे देवा वैकारिका दश ॥ दिग्वातार्कप्रचेतोश्विवह्नींद्रोपेंद्रमित्रकाः
॥३०॥ तैजसात्तु विकुर्वाणादिंद्रियाणि दशाभवन् ॥ ज्ञानशक्तिः क्रियाशक्तिः बुद्धिः प्रा
णस्तु तैजसौ ॥ श्रोत्रं त्वग्घ्राणदृग्जिह्वा वाग्दोर्मेढ्रांघ्रिपायवः ॥३१॥ यदैते संगता भावा
भूतेंद्रियमनोगुणाः ॥ यदायतननिर्माणे न शेकुर्ब्रह्मवित्तम ॥३२॥ ॥ ॥

कारकार्यौ ॥ अतो ज्ञानक्रियाविशेषरूपाणींद्रियाण्यपि तैजसादभवन्नित्यर्थः ॥ तान्याह ॥ श्रोत्रमि
ति ॥ दोः पाणिः मेढ्रः उपस्थः क्रमस्त्वत्र न विवक्षितः ॥३१॥ एवं कारणसृष्टिमुक्त्वा कार्यसृष्टिमाह ॥
यदा एते असंगताः अमिलिता आसन् ॥ अत एव यदा आयतनस्य शरीरस्य निर्माणे न शेकुः ॥३२॥

भा॰ द्वि॰ २४ सर्वासूनामस्मदादिप्राणानांतस्यनासेनासारंध्रेपरमायनेउत्तमस्थानेत्रेमोदप्रमोदयोश्चसामान्यविशेषगंधयोर्घ्रा
णः घ्राणेंद्रियंपरमायनंरूपाणांतेजसांरूपप्रकाशानांचक्षुरिंद्रियंअक्षिणीनेत्रगोलकेसर्वत्रषध्यंतानांप्र
थमांतंदेवेनद्रष्टव्यं॥कर्णौश्रोत्राधिष्ठानेश्रोत्रमिंद्रियं॥तस्यगात्रंशरीरं॥वस्तूनांयेसारांशाःतेषांभाजनं
स्थानं॥३॥अस्यत्वक्स्पर्शस्यवायोश्चेत्यर्थः॥सर्वस्यमेधस्ययज्ञस्य॥उद्भिज्जजातीनांसर्ववृक्षाणांयैर्वृक्षै

सर्वासूनांचवायोश्चतन्नासेपरमायने॥अश्विनोरोषधीनांचघ्राणोमोदप्रमोदयोः॥२॥रूपाणां
तेजसांचक्षुर्दिवःसूर्यस्यचाक्षिणी॥कर्णौदिशांचतीर्थानांश्रोत्रमाकाशशब्दयोः॥तद्गात्रंवस्तु
स्य साराणांसौभगस्यचभाजनं॥३॥त्वगस्यस्पर्शवायोश्चसर्वमेधस्यचैवहि॥रोमाण्युद्भिज्जजातीनां
यैर्वायज्ञस्तुसंभृतः॥४॥केशश्मश्रुनखान्यस्यशिलालोहाभ्रविद्युतां॥बाहवोलोकपालानांप्रायः
24 शःक्षेमकर्मणां॥५॥विक्रमोभूर्भुवःस्वश्चक्षेमस्यशरणस्यच॥सर्वकामवरस्यापिहरेश्चरणआस्पदं
॥६॥

यज्ञःसम्यक्साधितःतेषामेववा॥४॥केशामेघानांतेत्रंपर्वतयोक्तेःश्मश्रूणिविद्युतांपादकरनखानिशि
लालोहानामितिसार्द्धपादद्वयंक्षेमकर्मणांपालनकर्त्तॄणां॥५॥विक्रमःपादन्यासोभूरादिलोकानांआस्प
दंआश्रयः।भूरादिशब्दानामव्ययत्वात्षष्ठ्यालुक्क्षेमोलब्धरक्षणंशरणंभयाद्रक्षणंसर्वेषांकामानांवर राम॰ २४
स्यवरणस्यापिहरेरंघ्रिरास्पदं॥६॥

स्तनद्वयादितिउपासनार्थत्वादूर्ध्वाधोभाववैपरीत्यंनदोषः॥ पद्भ्यामित्तनत्वशब्दंकुर्वतयदोषद्वयंतस्मादित्यर्थः॥ ब्र
ह्मलोकश्चैकं टीका: सनातनःनित्यःनतुसर्गप्रपंचांतर्वर्त्तीत्यर्थः॥३८॥ इदानींचतुर्दशलोकपक्षंदर्शयति
तत्रजघनादिभिर्भूरादयःपूर्वोक्ताएवसप्तकट्यादिभिरधःसप्तलोकानाह॥ तत्कट्यामितिद्वाभ्यां॥ शुद्धंहरिभ
क्तनिवासत्वात्॥३९॥४०॥ त्रिलोकपक्षमाह॥ भूर्लोकःपातालादिसहितः॥४१॥ इतिद्वितीयेपंचमःषष्ठेविराड्

ग्रीवायांजनलोकश्चतपोलोकस्तनद्वयात्॥ मूर्द्धभिःसत्यलोकस्तुब्रह्मलोकःसनातनः॥३८॥ तत्कट्यांचा
तलंक्लृप्तमूरुभ्यांवितलंविभोः॥ जानुभ्यांसुतलंशुद्धंजंघाभ्यांतुतलातलं॥३९॥ महातलंतुगुल्फाभ्यां
प्रपदाभ्यांरसातलं॥ पातालंपादतलतइतिलोकमयःपुमान्॥४०॥ भूर्लोकःकल्पितःपद्भ्यांभुवर्लोको
स्यनाभितः॥ स्वर्लोकःकल्पितोमूर्ध्नाइतिवालोककल्पना॥४१॥ इतिश्रीभागवतेमहापुराणेद्वितीयस्कं
धेपंचमोध्यायः॥५॥ ब्रह्मोवाच॥ वाचांवह्नेर्मुखंक्षेत्रंछंदसांसप्तधातवः॥ हव्यकव्यामृतान्नानांजिह्वासर्वर
सस्यच॥१॥

भूतिश्चप्रोक्ताध्यात्मादिभेदतः॥ दृढीकृतंचपूर्वोक्तंसर्वपुरुषस्यततः॥ इदानींवैराजस्यविभूतिःस
प्रपंचमनुवर्ण्यतेवाचांअस्मदादीनांवागिंद्रियाणांतदधिष्ठातुर्वह्नेश्चतस्यमुखंक्षेत्रंउत्पत्तिस्थानं॥ छंदसांगायत्र्या
दीनांसप्तानांतस्यसप्तधातवः॥ त्वगादयःक्षेत्रंहव्यंदेवानामन्नंकव्यंपितॄणां॥ अमृतंतदुभयशेषोमनुष्याणांतेषाम
न्नानांसर्वरसस्यमधुरादेःषड्विधस्यचकारादस्मदादिरसनेंद्रियस्यतदधिष्ठातुर्वरुणस्यचएतस्यजिह्वाक्षेत्रं

उत्पत्तिस्थानं

भा० द्वि जलंचस्थलंचनभश्चौकांसियेषांतेनभौकसइतिसंधिरार्षः॥१४॥ सर्वंपुरुषएवनततःपश्यगित्यर्थः॥ प्र
२५ पंचेनतस्योपरिकेदंवक्तुंसमर्थमितिसस्यार्थमाह॥ तेनपुरुषेण॥ विश्वमितिभूमिपदस्यार्थः॥ वित
स्तिमितिदशांगुलपदस्य॥ अधीत्यतिशब्दस्यसचवितस्तिमधिकंव्याप्यतिष्ठतीति अधिकमा
त्रंविवक्षितंनपरीमाणं॥ अनुपयोगादपरिच्छिन्नत्वाच्च॥१५॥ एतत्सदृष्टांतमाह॥ असौप्राणःआदि

आ

गंधर्वाप्सरसोयक्षारक्षोभूतगणोरगाः॥ पशवःपितरःसिद्धाःविद्याध्राश्चारणाद्रुमाः॥१३॥ अन्ये
25 चविविधाजीवाजलस्थलनभौकसः॥ ग्रहर्क्षकेतवस्तारास्तडितःस्तनयित्नवः॥१४॥ सर्वंपु
रुषएवेदंभूतंभव्यंभवच्चयत्॥ तेनेदमावृतंविश्वंवितस्तिमधितिष्ठति॥१५॥ स्वधि
ष्ण्यंप्रतपन्प्राणोबहिश्चप्रतपत्यसौ॥ एवंविराजंप्रतपंस्तपत्यंतर्बहिःपुमान्॥ सोमृ
तस्याभयस्येशोमर्त्यमन्नंयदत्यगात्॥१६॥

त्यः॥ असौवाआदित्यःप्राणइतिश्रुतेःस्वधिष्ण्यंमंडलंप्रकाशयन्यथाबहिश्चप्रकाशयति॥ एवंविराट्
देवंप्रकाशयन्ब्रह्मांडमंतर्बहिश्चप्रकाशयति॥ नित्यमुक्तत्वंदर्शयितुंउतामृतत्वस्येत्यस्यार्थमाहस
इति॥ अभयस्येतिमंत्रगतामृतपदव्याख्या अन्नेनेतिपदंविभक्तिव्यत्ययेनव्याचष्टे॥ मर्त्यंमरणधर्म राम०
कं अन्नंकर्मफलंयस्मादत्यगात्॥ अतिक्रांतवानतोनकेवलंसर्वात्मकः किंतुअमृतत्वस्यापिनिजानं २५

वीर्यस्यशुक्रस्यशिश्नोधिष्ठानं॥उपस्थस्त्विन्द्रियं प्रजात्यानंदः संतानार्थः संभोगस्तेन निर्वृतिः तापहानिस्तस्याः॥
७॥परिमोक्षस्यमलत्यागस्यपायुरिंद्रियंगुदः स्थानं॥ निर्ऋतेरलक्ष्म्याः॥८॥तमसोऽज्ञानस्य पश्चिमः पश्चभागःगो
त्राणांगिरीणां॥अस्थिसंघातः॥९॥अव्यक्तं प्रधानंरसः अन्नादिसारः॥सिंधवःसमुद्रास्तेषां निधनस्यलयस्य
उदरेपदंस्थानंविदितं ज्ञानिभिः॥मनसः अस्मदादिलिंगशरीरस्य॥१०॥तुभ्यंतवकुमाराणांसनकादीनां

अपांवीर्यस्यसर्गस्यपर्जन्यस्यप्रजायतेः॥पुंसःशिश्नउपस्थस्तु प्रजात्यानंदनिर्वृतेः॥७॥पायुर्य
मस्यमित्रस्य परिमोक्षस्यनारद॥हिंसायानिर्ऋतेर्मृत्योर्निरयस्यगुदःस्मृतः॥८॥ पराभूतेरधर्मस्य
तमसश्चापिपश्चिमः॥नाड्योनदनदीनांतुगोत्राणामस्थिसंहतिः॥९॥अव्यक्तरससिंधूनांभूता
नांनिधनस्यच॥उदरंविदितंपुंसोहृदयंमनसःपदं॥१०॥धर्मस्यममतुभ्यंच कुमाराणांभवस्य
च॥विज्ञानस्यचसत्वस्यपरस्यात्मापरायणं॥११॥अहंभवानभवश्चैवतइमेमुनयोऽग्रजाः॥
सुरासुरनरानागाःखगामृगासरीसृपाः॥१२॥

भवस्यश्रीरुद्रस्य आत्माचित्तं परमायणं॥११॥एवंतावत
परमेश्वराज्जातंविश्वं॥ततोनभिन्नंपृथगुक्तं इत्वंसुवर्णान्न पृथक्सतुसर्वनियंतासर्वप्रकाशकोनित्यमु
क्त इत्यर्थादुक्तंएतदेवपुरुषसूक्तार्थकथनेनद्रढयति॥तत्रसहस्रशीर्षेत्यर्द्धर्चस्य॥ब्राह्मणोस्यमुखमा
सीदित्यादेश्चसत्क्रयस्यार्थःपूर्वाध्याय एवदर्शितः॥पुरुषएवेदंसर्वमित्यस्यार्थंदर्शयति॥अहंभवानिति

भा·द्वि· गृहमेधस्त्वंतः॥ यस्मादबृहद्व्रतः ब्रह्मचर्यव्रतरहितः॥१८॥ अयंचाधिकारभेद एकस्यैवावस्थाभेदेनन
२६ त्वत्यंतभिन्नविषय इतिदर्शयंस्ततो विद्याविद्ये स्पार्थमाह विविधं सुष्ठु अंचतीति विष्वङ् पुरुषस्तेत्रजुः॥ स
तीमार्गौ दक्षिणोत्तरौ विचक्रमे चलतिस्म॥ कथंभूते सृतीसाशनानशने भोगापवर्गप्राप्तिसाधनभूते॥

अंतस्त्रिलोक्यास्त्वपरोगृहमेधोऽबृहद्व्रतः॥ सृती विचक्रमे विष्वङ् साशना
26 नशने उभे॥ यदविद्या च विद्या च पुरुषस्तूभयाश्रयः॥ यस्मादंडं विराड्ज १९
ज्ञे भूतेंद्रियगुणात्मकः॥ तत्द्रव्यमत्यगाद्विश्वं गोभिः सूर्य इवातपन्॥२०॥

अत्र हेतुत्वेन पुनर्विशेषणोद्यतः॥ अविद्या कर्मरूपा विद्या च तत्साधनोपासनारूपा॥१९॥ तदे
वं विराडंतर्वर्तिनां फलवैचित्र्यमुक्त्वा तत्कारणस्य ईश्वरस्य तत्त्वैलक्षण्यं दर्शयितुं तस्माद्विराड्जायते तत्पस्या
र्थमाह॥ यस्मादंडं जज्ञे तच्च भूतेंद्रियगुणात्मको विराट् च जज्ञे स ईश्वरस्तु ... द्विश्वं विराड्देहं द्रव्यं १२
अंडं च अतिक्रांतवान् सूर्य इवेति पूर्वोक्त एव दृष्टांतः॥२०॥

राम· २६

प्रपंचात्मकस्यकुतोनित्यमुक्तत्वमित्याशंकातत्परिहाराय॥एतावानस्येत्यस्यार्थमाह महिमेतिप्रपंचात्मकस्याप्य मतेशत्वमित्येषमहिमादुरत्ययः अपारःप्रपंचानभिभूतत्वादितिभावः मंत्रेणचएतावानस्यमहिमाविभूतिःस्तु ज्यायानमहत्तरइतिवदता एमेवार्थउक्तःतदेवमीश्वरोनित्यमुक्तइत्युक्तंतदाश्रितानांभूतानांबंधमोक्षौव्यव स्थयेतिदर्शयन्पादोस्यविश्वाभूतानीत्यस्यार्थमाह॥पादेष्विति तिष्ठंत्यत्रेतिस्थितितयोभूरादिलोकाःतेपादा इवपादाः॥अंशायस्यसःस्थितिपाततस्यपादेष्वंशभूतेषुलोकेषुसर्वान्जीवानविदुःमंत्रेतुपादोस्यविश्वा भूतानीतिसामानाधिकरण्यमधिष्ठानाधिष्ठेययाभेदविवक्षयापादइत्येकवचनंचसामान्याभिप्रायेणेतिव्याख्या

महिमैषततोब्रह्मन्पुरुषस्यदुरत्ययः॥पादेषुसर्वाभूतानिपुंसःस्थितिपदोविदुः॥१७॥अमृतंक्षेमम भयंत्रिमूर्द्धोधायिमूर्द्धसु॥पादास्त्रयोबहिश्चासन्नप्रजानांयआश्रमाः॥१८॥

नभवति॥१७॥भूतेषुफलवै

चित्र्यंदर्शयन्त्रिपादस्यामृतंदिवीत्यस्यार्थमाह॥अस्येश्वरस्यसंबंधित्रिपादमृतंनित्यसुखंदिविऊर्ध्वलोके षुनत्रिलोक्यामित्यर्थः॥तदेवत्रिपात्त्वंचोर्ध्वंत्रैविध्यंदर्शयन्नाह॥त्रयाणांलोकानांमहर्जनमहर्लोकःतस्यमूर्द्धान स्तदुपरितनलोकास्तेषुयथाक्रमंअमृतादिकंअधायिनिहितं॥तत्रत्रिलोक्यांनश्वरमेवसुखं॥महर्लोकस्यक्रम मुक्तिस्थानत्वेपिकल्पांतेतुतत्यानांस्थानत्यागात्राविनाशिसुखंजनलोकेत्वमृतमविनाशिसुखंयावज्जीवंतत्स्था नापरित्यागात्किंतुमहर्लोकवासिनांकल्पांतेत्रिलोकदाहेधूमपीडितानांतदातत्रगमनात्तेभ्यदर्शनमस्ति॥तपोलो केतस्याभावात्क्षेममेवक्षयतिहित्रिलोक्यांदह्यमानायांशंकासंकर्षणाग्निनायांत्यस्माण्णमहर्लोकात्तज्जंनभ यादयोदिताइति सत्यलोकेत्वभयंभोदः तन्नत्यासत्तेः॥एतदेववेचित्र्यमधिकारिभेदेनोपपादयन्त्रिपादूर्ध्वंइत्यस्या

भा॰ द्वि॰ गतयो विष्णुक्रमाद्याः॥मतयो देवताध्यानानि॥कृतस्य भगवति समर्प्पणं॥२५॥संभृताः संपादिताः संभारा येन सोऽहं
२७ तेनैव यज्ञेनैव॥अनेन यज्ञेन यज्ञमयजंतेति मंत्रार्थः सूचितः॥२६॥तेन देवा अयजंत इत्यस्यार्थं सप्रपंचं दर्शय
ति॥तत इति द्वाभ्यां॥व्यक्तं इंद्रादिरूपेण॥अव्यक्तं स्वतः॥अनेन पुरुषं जातमग्रत इत्यस्यार्थो दर्शितः॥२७॥का

गतयो मतयश्चैव प्रायश्चित्तं समर्प्पणं॥पुरुषावयवैरेते संभाराः संभृता मया॥२५॥इति संभृतसं
भारः पुरुषावयवैरहं॥तमेव पुरुषं यज्ञं तेनैवायजमीश्वरं॥२६॥ततस्ते भ्रातर इमे प्रजानां पतयो
24 नव॥अयजन्व्यक्तमव्यक्तं पुरुषं सुसमाहिताः॥२७॥ततश्च मनवः काले ईजिरे ऋषयोऽपरे॥पित
रो विबुधा दैत्या मनुष्याः क्रतुभिर्विभुं॥२८॥नारायणे भगवति तदिदं विश्वमाहितं॥गृहीतमा
योरुगुणः सर्गादावगुणः स्वतः॥२९॥सृजामि तन्नियुक्तोऽहं हरो हरति तद्वशः॥विश्वं पुरुषरूपे
ण परिपाति त्रिशक्तिधृक्॥३०॥

ले स्वस्वावसरे॥२८॥यदधिष्ठानमित्येतत्प्रश्नोत्तरार्थमुपसंहरति॥नारायण इति आहितं अधिष्ठितं॥भग
वत्त्वे हेतुः यः स्वतो गुणाः सर्गादौ गृहीतामायया उरवो गुणा येन तस्मिन्॥२९॥यत्परस्त्वमित्येतत्प्रश्नोत्तरं य
दुक्तं स एष भगवान्सर्व्वेषां मम चेश्वर इति तदुपसंहरति सृजामीति पालनं तु स्वयमेव करोतीत्याह विश्वमि राम॰
ति पुरुषरूपेण त्रिशक्तिर्मायां तां धरतीति तथा सः॥३०॥ ॥ ॥ २७

नन्वेवंपुरुषएवचेत्सर्वंतर्हियज्ञस्यतत्साधनानांचपृथक्त्वाभावात्यज्ञैःपुरुषाराधनंनसिद्ध्येदित्याशंक्यतत्पं
रिहाराययत्पुरुषेणाहविषेत्यादिमंत्रार्थंसंगत्यादर्शयतियदेत्यादिना॥अस्येतिविराडंतर्यामिणःतस्यैवप्र
कृतत्वात्नाभौभवंनाभ्यंतस्मात्॥यज्ञस्यसंभारान्साधनानिनापश्यं॥२१॥तदातेषुसंभारेषुसाध्येषुसत्सु॥
पुरुषावयवैःएतेसंभाराःसंभृताइतिचतुर्थेनाह्वयःवनस्पतयोयूपाःदेवयजनंयज्ञभूमिः॥इदंचेतिवच

यदास्यनाभ्यान्नलिनादहमासंमहात्मनः॥नाविदंयज्ञसंभारान्पुरुषावयवादृते॥२१॥तेषु
यज्ञस्यपशवःसवनस्पतयःकुशाः॥इदंचदेवयजनंकालश्चोरुगुणान्वितः॥२२॥वस्तू
न्योषधयःस्नेहारसलोहमृदोजलं॥ऋचोयजूंषिसामानिचातुर्होत्रंचसत्तम॥२३॥नाम
धेयानिमंत्राश्चदक्षिणाश्चव्रतानिच॥देवतानुक्रमःकल्पःसंकल्पस्तंत्रमेवच॥२४॥

नाधर्मार्हस्थानेऽपचितिःकथयतीतिगम्यते॥बहुगुणान्वितोवसंतादिकालः॥२२॥वस्तूनियात्रादीनि॥
ओषधयोव्रीह्यादयः॥स्नेहाघृतादयः॥रसामधुरादयः॥सुवर्णादीनिलोहानिमृदश्च॥२३॥चातुर्होत्रंहोत्रा
दिकर्म॥नामधेयानिज्योतिष्टोमादीनि॥ऋगादीनामुक्तत्वात्॥मंत्राइतिस्वाहाकारादयः॥देवतानामनु
क्रमउद्देशः॥कल्पोबौधायनादिकर्मपद्धतिग्रंथः॥अनेनाहंयजइतिसंकल्पः॥तंत्रमनुष्ठानप्रकारः॥१४॥

भा॰ द्वि॰ तदासमीयुषांशरणागतानांसंसारनिवर्त्तकंमंगलावहंसुसेव्यंच॥तस्यचरणांनतोस्मि॥ततोचिंत्यमहि
२८ मत्वेनज्ञातवानस्मीतिकैमुत्यन्यायेनाहयोहीतिस्वमायाविस्तारंय:स्वयमपिपर्यगात्॥परिशब्दो
निषेधे॥एतावानितिनज्ञातवानित्यर्थ:॥अपरेकुतोजानीयु:तस्यचरणांनतोस्मीतिपूर्वेणसंबंध:
ननुसर्वज्ञ:कथंनजानातिअंताभावादितिदृष्टांतेनाह॥यथास्वस्यांतंनभोनाप्नोति॥नाहंस्वपुष्या

नतोस्म्यहंतच्चरणंसमीयुषांभवच्छिदंस्वस्त्ययनंसुमंगलं॥योह्यात्ममायाविभवंस्मपर्यगा
द्यथानभ:स्वांतमथापरेकुत:॥३४॥नाहंनयूयंयदृतांगतिंविदुर्नवामदेव:किमुतापरेसु
रा:॥तन्माययामोहितबुद्धयस्त्विदंविनिर्मितंचात्मसमंविचक्ष्महे॥३५॥यस्यावतारक
र्माणिगायंतिह्यस्मदादय:॥नयंविदंतितत्वेनतस्मैभगवतेनम:॥३६॥ ॥ ॥

29

दर्शनंसार्वज्ञ्यंविहंतीतिभाव:॥तथाचश्रुति:द्युपतयएवतेनययुरंतमनंततयात्वमपियदंतरां
डनिचयानन्तुसावरणाइत्यादिश्रुतिश्च॥योस्याध्यक्ष:परमेव्योमन्सोऽङ्गवेदयदिवानवेदेति॥
३४॥एतस्यप्रपंचयंतिनाहमितिद्वाभ्यां॥वामदेवोरुद्र:यस्यऋतांगतिंपरमार्थस्वरूपंकिंविदु:प्रप
चरूपंतस्यमायाविनिर्मितंविचक्ष्महेविद्म:तदप्यात्मसमंस्वज्ञानानुरूपमेवनतुकृत्स्नं॥मोहित राम॰
बुद्धयइत्ययंतदज्ञानेप्रपंचज्ञानेचहेतु:॥३५॥ननुसर्वेपित्वांवर्णयंतोदृश्यंतेतत्राहयस्येति॥३६॥ २८

यत्रेदं विश्वंयदात्मकंयत्त्वमित्येवमादिसर्व्वप्रश्नानांसामान्योत्तरंयदुक्तंवासुदेवात्परोब्रह्मन्ननचान्यो
र्थोस्तितत्त्वतइतिपुरुषएवेदंसर्व्वमितिश्रुत्या चयदृढीकृतंतदुपसंहरति॥इतीति॥कार्यकारणा
त्मकंभावंसत्यंभगवतःसकाशादन्यत्पृथक्नभवतीत्यभिहितं॥३१॥यदुक्तंएतावत्त्वयताहि
मेतमविज्ञायमामीश्वरं प्रत्ववीषितदुपपाद्योपसंहरति॥नभारतीतियन्नयस्मान्मेमयाप्रोक्तंकृ

इतितेभिहितंतातयथेदमनुपृच्छसि॥नान्यद्भगवतःकिंचिद्भाव्यंसदसदात्म
कं॥३१॥नभारतीमेंगमृषोपलक्ष्यते॥नवैकचिन्मेमनसोमृषागतिः॥नमेहृषीकाणि
पतंत्यसत्पथेयन्मेहृदोत्कंठ्यवताधृतोहरिः॥३२॥सोहंसमाम्नायमयस्तपोमयःप्रजापती
नामभिवंदितःपतिः॥आस्थाययोगंनिपुणंसमाहितस्तंनाध्यगच्छंयतआत्मसंभवः॥३३॥

पम२

भक्त्युद्रेकःतथकृतेनहृदाहरिर्धृतःध्यातः॥अंगहेनारदअतःमेवाङ्मनःइंद्रियाणांवृत्तयःसत्यार्थाःनतु
मत्सभावेनेत्यर्थः॥३२॥अनस्वानुभवमेवान्वयव्यतिरेकाभ्यांप्रमाणंप्रतिद्धाभ्यां॥सोहंसमाम्नायादि
भिःसर्व्वोत्कृष्टोपियोगमाश्रित्यापियतआत्मनोममसंभवोजन्मतमेवनज्ञातवानकुतोऽन्यस्यवार्त्ता

भा॰द्वि॰ २९ अत्र विद्वदनुभवं प्रमाणयति ॥ हे ऋषे नारद प्रशांतात्मेंद्रियाशयाः प्रसन्नदेहेंद्रियमनसो यदा भवंति त
दा विदंति ॥ अन्यदा तदज्ञाने कारणमाह ॥ यदा तु तदेव प्रकाशमानमेव असतां तर्कैः विप्लुतं स्यात्त
दा तिरोधीयेतेति ॥ ३९ ॥ अवतारांश्च विस्तरेणाह ॥ आद्यइत्यादि यावत्समाप्ति ॥ परस्य भूम्नः पुरुषः प्रकृति
प्रवर्त्तकः ॥ यस्य सहस्रशीर्षेत्यादि लीलाविग्रहः स आद्योवतारः वक्ष्यति हि ॥ भूतैर्यदा पंचभिरात्मसृष्टैः
पुरं विराजं विरचय्य तस्मिन् ॥ स्वांशेन विष्टः पुरुषाभिधानमवाप नारायण आदिदेवः ॥ यथोक्तं विष्णो

29

ऋषे विदंति मुनयः प्रशांतात्मेंद्रियाशयाः ॥ यदा तदेवासत्तर्कैस्तिरोधीयेत विप्लुतं ॥ ३९ ॥ आ
द्योवतारः पुरुषः परस्य कालः स्वभावः सदसन्मनश्च ॥ द्रव्यं विकारो गुण इंद्रियाणि विराट् स्व
राट् स्थास्नु चरिष्णु भूम्नः ॥ ४० ॥

स्तु त्रीणि रूपाणि पुरुषाख्यान्यथो विदुः ॥ प्रथमं महतः स्रष्टृ द्वितीयं त्वंडसंस्थितं तृतीयं सर्वभूतस्थं ता
नि ज्ञात्वा विमुच्यत इति ॥ यद्यपि सर्वेषामविशेषेणावतारत्वमुच्यते ॥ तथापि कालश्च स्वभावश्च सदसदि
ति कार्यकारणात्मिका प्रकृतिश्चैताः शक्तयः मन आदीनि कार्याणि ब्रह्मादयो गुणावताराः दक्षा
दयो विभूतय इति विवेक्तव्यं मनः महत्तत्त्वं द्रव्यं महाभूतानि क्रमोत्र न विवक्षितः विकारो अहंका राम॰ २९
रः गुणः सत्त्वादिः विराट् ॥ समष्टिशरीरं ॥ स्वराट् वैराजः ॥ स्थास्नु स्थावरं ॥ चरिष्णु जंगमं च व्यष्टिशरीरं ॥ ४० ॥

अवतारकर्म्मणीसंक्षेपतोदर्शयतिस एषआद्योभगवानयःपुरुषावतारःसनसृष्ट्यादिकरोति॥आत्मात्म
न्यात्मनात्मानमिति॥कर्त्ता अधिकरणंसाधनंकर्मचस्वयमेवेत्यर्थःपुरुषावतारःसृष्ट्यादीनिचकर्मा
णीतिसंदेहेयोक्तिः॥३७॥नपंविंदंतितत्वेनेत्युक्तंकिंतत्तत्वमित्यपेक्षायामाह॥ज्ञानंकेवलंसत्यंतत्वंघटा
द्याकारवृत्तिज्ञानव्यवच्छेदार्थंविशेषणानिविशुद्धंविषयाकारशून्यंयतःप्रत्यक्सर्वांतरं॥अतएवस
म्यक्संदेहादिरहितं॥अवस्थितंस्थिरंयतोनिर्गुणंगुणकार्यंदेहिगुणव्यतिकराद्धिचलंभवति॥यद्यपि

सएषआद्यःपुरुषःकल्पेकल्पेसृजत्यजः॥आत्मात्मन्यात्मनात्मानंसंयच्छतिचपातिच॥३७॥
विशुद्धंकेवलंज्ञानंप्रत्यक्सम्यगवस्थितं॥सत्यंपूर्णमनाद्यंतंनिर्गुणंनित्यमद्वयं॥३८॥

वृत्तिज्ञानमपिस्वरूपज्ञानमेवेतिनचांचल्यादिदोषयुक्तंतथाप्यंतःकरणवृत्तिदोषैस्तथातथाभवतीति
व्यवच्छिद्यते॥एभिरेवविशेषणैःसत्यत्वमपिसमर्थितं॥किंच॥यद्विकारवत्तत्तदसत्यंदृष्टं॥नचास्यजन्मा
दयःषड्विकाराःसंतीत्याह॥अनाद्यंतंजन्मनाशरहितं॥अतएवजन्मानंतरास्तित्वलक्षणोपिविकारोना
स्ति॥वृद्धिविपरिणामापक्षयाश्चनसंतियतःपूर्णंसर्वत्वेहेतुःनित्यमद्वयंनित्यंसर्वदाद्वैतप्रतीतिसमयेऽ
पिपरमार्थतोऽद्वयमिति॥३८॥

दंष्ट्रया दितितितलोद्धरणायोद्यतः इयं पृथ्वी यथा कदेरुपरि मूले अहन्निति ... विरोधः वज्रं तत्रैव व्याख्येयं करेणेति करवत्साधनपरं अ
वर्तमाने दंष्ट्रया हन्निति २

भा॰ द्वि॰ इति द्वितीये षष्ठः ॥ सप्तमे भगवल्लीलावतारा ब्रह्मणोदिताः । नारदाय तु तत्कर्मप्रयोजनगुणैः सह [1] यत्र यदा क्षि
३० तितलोद्धरणार्थं वाराहीं तनुं बिभ्रद् उद्यतोऽनंतः । तदा तं सुप्रसिद्धं हिरण्याक्षं दंष्ट्रया ददार ॥ १ ॥ यज्ञावतारमा
ह ॥ रुचेः प्रजापतेः सकाशात्तद्भार्यायाः आकूतेः स तु सुयज्ञो नाम जातः । स च स्वभार्यायां दक्षिणायां सुयमान्दे

इति श्रीभागवते महापुराणे द्वितीयस्कंधे षष्ठोऽध्यायः ॥ ६ ॥ ब्रह्मोवाच । यत्रोद्यतः क्षितितलोद्धरणा
य बिभ्रत् क्रौडीं तनुं सकलयज्ञमयीमनंतः ॥ अंतर्महार्णव उपागतमादिदैत्यं तं दंष्ट्रयाद्रिमिव
वज्रधरो ददार ॥ १ ॥ जातो रुचेरजनयत् सुयमान् सुयज्ञ आकूतिसूनुरमरानथ दक्षिणायां ॥ लोकत्र
यस्य महतीमहरद्यदार्तिं स्वायंभुवेन मनुना हरिरित्यनूक्तः ॥ २ ॥ जज्ञे च कर्दमगृहे द्विज देवहूत्यां
स्त्रीभिः समं नवभिरात्मगतिं स्वमात्रे ॥ ऊचे ययात्मशमलं गुणसंगपंकमस्मिन्विधूय कपिलस्य गतिं
प्रपेदे ॥ ३ ॥

देवान् अजनयत् ॥ स एवेंद्रः सन् यदा आर्तिमहरत् । तदा पूर्वं सुयज्ञ इत्युक्तोऽपि अयं उपश्चात्
मनुना मातामहेन हरिरित्युक्तः ॥ अनेन देवोत्पादनं लोकत्रयार्तिहरणं च तस्य कर्म दर्शितं । एवं सर्वत्रावतार
स्तत्कर्म च ज्ञेयं ॥ २ ॥ कपिलावतारमाह ॥ कर्दमस्य प्रजायते गृहे च तद्भार्यायां देवहूत्यां जज्ञे ॥ नवभिः स्त्री
भिर्भगिनीभिः सह ॥ स च स्वमात्रे आत्मगतिं ब्रह्मविद्यां उक्तवान् । यया आत्मगत्या सा आत्मनः शमलं मलिनी राम॰
करणं गुणसंगरूपं पंकं अस्मिन्नेव जन्मनि विधूय कपिलस्य गतिं मुक्तिं प्राप्तवती ॥ ३ ॥ ॥ ३०

अहं च हर्भवो रुद्रः यज्ञो विष्णुः दक्षादयो य इमे प्रजेशाः । तललोकपालाः पातालाधिपतयः ॥ ४१ ॥ गंधर्वादीनामी
शाः । यक्षादीनां नाथाः ॥ रक्षोरगेति संधिरार्षः ॥ ऋषीणां च श्रेष्ठाः ॥ ४२ ॥ प्रेतादीनामधीशाः ॥ ४३ ॥ किं बहुना य
त्किंचिद्भगवदादितत्सर्वं परमेव तत्त्वमित्यन्वयः भगवत्त्वमैश्वर्ययुक्तं । महस्वत्तेजो युक्तं । ओजः सह
स इंद्रियमनःशक्ती तथा कं बलं तदान्वयं श्रीः शोभा ह्रीः कर्मजुगुप्सा । विभूतिः संपत्तिः । आत्मा बुद्धिः त

अहं भवो यज्ञ इमे प्रजेशा दक्षादयो ये भवदादयश्च । स्वर्लोकपालाः स्वर्गलोकपाला नृलोकपालास्त
ललोकपालाः ॥ ४१ ॥ गंधर्वविद्याधरचारणेशा ये यक्षरक्षोरगनागनाथाः ॥ ये वा ऋषीणामृषभाः पि
तॄणां दैत्येंद्रसिद्धेश्वरदानवेंद्राः ॥ ४१ ॥ अन्ये च ये प्रेतपिशाचभूतकूष्मांडयादोमृगपक्ष्यधीशाः
॥ ४३ ॥ यत्किंच लोके भगवत्महस्वदोजःसहस्वद्बलवत्क्षमावत् ॥ श्रीह्रीविभूत्यात्मवदद्भुतार्णं
तत्त्वं परं रूपवदस्वरूपं ॥ ४४ ॥ प्राधान्यतो यानृष आमनंति लीलावतारान्पुरुषस्य भूम्नः ॥ आपी
यतां कर्णकषायशोषानुक्रमिष्ये त इमान्सुपेशान् ॥ ४५ ॥

क्ष क्तं अर्णो वर्णः ॥ अद्भुतार्णं आश्चर्यवर्ण
मित्यर्थः ॥ रूपमेव स्वरूपं रूपवत् ॥ अरूपं च यत्तत्सर्वं परं तत्त्वं । तद्विभूतिरित्यर्थः ॥ ४४ ॥ शुद्धसत्त्वावतारान्
वक्तुमाह प्राधान्यत इति ॥ असत्कथाश्रवणीयैः कर्णयोः कषायाः मलाः तान् शोषयंतीति तथा तान्सुपेशान्सुं
दरान् सकारलोपश्चार्षः हे ऋषे ते तुभ्यं अनुक्रमिष्ये । तदनुक्रमेणामृतं त्वया पीयतामित्यर्थः ॥ यद्वा पीयता
मिति शास्त्रंतं । आपिबतो कर्णकषायशोषानित्यर्थः ॥ ४५ ॥

नरनारायणावतारमाह। धर्मस्य यत्यां दक्षदुहितरि मूर्तिसंज्ञायां नारायणो नर इति मूर्तिद्वयेन जातः। कथंभूतः
स्वः असाधारणस्तपःप्रभावो यस्य। तदेवाह। अनंगस्य पृतना देव्योऽप्सरसः भगवतः सकाशात् आत्मनः स्वप्र
तिरूपाः उर्वश्याद्याः स्त्रीर्दृष्ट्वा तस्य नियमावलोपं व्रतभंगं घटितुं साधयितुं न शेकुः। यद्वा। आत्मनः स्वस्य यो
नियमः तयोर्नाशनरूपं तस्य अवलोपं तत्र दृष्ट्वा भगवतस्तं घटयितुं न शेकुरिति। एतद्व्याख्यानमेकादशे भ

धर्मस्य दक्षदुहितर्यजनिष्ट मूर्त्यां नारायणो नर इति स्वतपःप्रभावः। दृष्ट्वात्मनो भगवतो नि
यमावलोपं देव्यस्त्वनंगपृतना घटितुं न शेकुः। ६। कामं दहंति कृतिनो ननु रोषदृष्ट्या रोषं दहंत
मुत ते न दहंत्यसह्यं। सोऽयं यदंतरमलं निविशन् बिभेति कामः कथं नु पुनरस्य मनः श्रयेत॥७॥

विष्यति। ६। यत्र कामविजयी क्रोधोऽपि बिभेति तत्र कामो न प्रभवतीति किं वक्तव्यमित्याह कामममिति॥
कृतिनः श्रीरुद्रप्रमुखाः रोषयुक्तया दृष्ट्या कामं दहंति रोषं त्वात्मानं दहंतमपि ते न दहंति। क्रोधेनाभि
भूयंत इत्यर्थः। ननु अहो सोऽयं रोषो यदंतरं यन्मध्यं प्रविशन्नलं बिभेति पद्माद्यस्यांतःमनः कथंभूतं अमलं
निर्मलं प्रविशन्निति॥७॥

दत्तात्रेयावतारमाह ॥ मयाऽहमेव तुभ्यं दत्त इति यद्यत आह ततः स नाम्ना दत्तो जातः ॥ स्वभक्तेभ्यो योगैश्वर्यदानं
तच्चरितं दर्शयति यस्य पादपंकजयोः परागः तेन पवित्रा देहा येषां ते उभयीं ऐहिकीं आमुष्मिकीं च भुक्तिमु
क्तिरूपां वा ॥४॥ कुमारावतारमाह मे मया आदौ यत्तप्तस्तप्तं तस्मात् स्वतपसः मत्तपसो हेतोः स हरिः चतुःस

अत्रेरपत्यमभिकांक्षत आह तुष्टो दत्तो मयाहमिति यत् भगवान् स दत्तः ॥ यत्पादपंकजपराग
पवित्रदेहा योगर्द्धिमापुरुभयीं यदुहैहयाद्याः ॥ तप्तं तपो विविधलोकसिसृक्षया मे आदौ स
नात् स्वतपसः स चतुःसनोऽभूत् ॥ प्राक्कल्पसंप्लवविनष्टमिहात्मतत्त्वं सम्यक् जगाद मुन
यो यदचक्षतात्मन् ॥५॥

नोऽभूत् सनत्कुमारः सनकः सनंदनः सनातन इति चत्वारः सनशब्दा नाम्नि यस्य सः कथंभूतात् स्वतपसः स
नात् अखंडितात् ॥ यद्वा स्वतपसः सनात् दानात् समर्पणादित्यर्थः ॥ षणु दाने ॥ स च पूर्वकल्पस्य संप्लवे
प्रलये विनष्टं ज्ञानं संप्रदायं आत्मतत्त्वं इह अस्मिन् कल्पे सम्यक् जगाद उक्तवान् ॥ सम्यक्त्वं दर्शय सं॰ नाम सनंदनादिः ३
ति ॥ यदुदितमात्रमेव मुनयः आत्मन् मनसि अचक्षत साक्षादपश्यन् ॥५॥ ॥

अ॰ बिभीआइ तिरो
घः २

भा॰द्वि॰ ऋषभावतारमाह ॥ असौ हरिर्नाभेराग्नीध्रपुत्रात्सुदेव्याः सूनुरास ॥ नाभेर्भार्यायां मेरुदेव्याम् एव सुदेवीत्यपि
३२ संज्ञा जडवद्योगेन नित्यसमाधिना चर्यां यदिति यां ॥ तत्र हेतुः समदृक् तत्रापि हेतुः स्वस्थः स्वरूपे स्थितः य
तः प्रशांतेंद्रियः तत्कुतः परितो मुक्तसंगः ॥१०॥ हयग्रीवावतारमाह ॥ सत्र इति अथो इति पदार्थांतरे ॥ स एव साक्षा
द्भगवान्मम ब्रह्मणः सत्रे यज्ञे हयशीर्षा आस ॥ तपनीयं सुवर्णं तद्वद्वर्णो यस्य ॥ छंदोमयः वेदमयः तद्वि

32 नाभेरसावृषभ आस सुदेविसूनुर्यो वै चचार समदृक् जडयोगचर्यां ॥ यत्पारमहंस्यमृषयः प
दमामनंति स्वस्थः प्रशांतकरणः परिमुक्तसंगः ॥१०॥ सत्रे ममास भगवान्हयशीर्षाथो साक्षात्स
यज्ञपुरुषस्तपनीयवर्णः छंदोमयो मखमयोऽखिलदेवतात्मा वाचो बभूवुरुशतीः श्वसतो
ऽस्य नस्तः ॥११॥ मत्स्यो युगांतसमये मनुनोपलब्धः क्षोणीमयो निखिलजीवनिकायकेतः ॥ विस्रंसि
तानुरुभये सलिले मुखान्मे आदाय तत्र विजहार ह वेदमार्गान् ॥१२॥

धेयाय मखाः तन्मयः ॥ अमंत
मय इति वा पाठः ॥ मखैरिज्यमाना अखिला देवतास्तदात्मा च ॥ अस्य श्वसतः श्वासं मुंचतः नस्तः नासापुटात्
उशतीः उशत्यः कमनीया वेदलक्षणा वाचो बभूवुः ॥११॥ मत्स्यावतारमाह ॥ मत्स्य इति भाविना वैवस्वतेन मनुना दृ
ष्टः क्षोणीमयः पृथ्वीप्रधानः तदाश्रय इत्यर्थः ॥ अत एव निखिलजीवनिकायानामाश्रयः ॥ मे मुखाद्विस्रं राम
सितान् गलितान् वेदमार्गान् वेदानादाय तत्र युगांतसलिले विजहार ह हर्षेण ॥१२॥ ॥ ३२

८

चरित्रैरौत्तमकमप्यवतारं सूचयति। मातुः सपत्न्या उदितानि उक्तानि वाक्यान्येव पत्रिणो बाणाः तैर्विद्धो
ध्रुवः। राज्ञ उत्तानपदोऽतिसमीपे तपसे तपस्तप्तुं। ध्रुवगतिं ध्रुवपदं। यत्र यां उपरिस्थिता अधस्तात्
स्थिताः। दिवि भवा दिव्याः सप्तर्षयः स्तुवंति। यद्वा उपरिस्थिता भृग्वादयः अधस्तात्सप्तर्षय इति। ८

विद्धः सपत्न्युदितपत्रिभिरंति राज्ञो बालोपि सन्नुपगतस्तपसे वनानि। तस्मा अदात् ध्रुवगतिं गृणते प्रसन्नो दिव्याः स्तुवंति मुनयो यदुपर्यधस्तात्॥ ८॥ यद्वेनमुत्पथगतं द्विजवाक्यवज्रविप्लुष्टपौरुषभगं निरये पतंतं। त्रात्वार्थितो जगति पुत्रपदं च लेभे दुग्धा वसूनि वसुधा सकलानि येन॥ ९॥

पृथ्ववतारमाह यद्वेदा। ऋषिभिरर्थितः तदा वेनं त्रात्वा अर्थितः तत्पुत्र इति पदं नाम लेभे। पुन्नाम्नो नरकाद्य
स्मात् पितरं त्रायते सुतः तस्मात्पुत्र इति प्रोक्तः स्वयमेव स्वयंभुवेति हि पुत्रपदव्युत्पत्तिः। कथंभूतं। द्विजा
नां शापवाक्यमेव वज्रं तेन विप्लुष्टं दग्धं पौरुषं भगमैश्वर्यं च यस्य तं। चरित्रांतरमाह। येन च जगति ज
गदर्थं वसूनि रत्नादि द्रव्याणि दुग्धा॥ ९॥

भा॰ द्वि॰ ३३ हरिर्गजेन्द्रावतारमाह अन्तरिति युगलेन गजयूथस्य पतिः ॥ तीर्थरूपं श्रवो यशो यस्य स तीर्थश्रवाः हे तीर्थ
श्रवः श्रवणेनैव मंगलं नामधेयं यस्य ॥१५॥ तद्वचनं श्रुत्वा शरणार्थिनं तं हस्ते शुण्डायां प्रगृह्य किंकृ
त्वा नक्रस्य ग्राहस्य वदनं विनिपाट्य विदार्य तस्मात् उदकात् ॥१६॥ वामनावतारमाह ॥ अदितेः सुता

अन्तःसरस्युरुबलेन पदे गृहीतो ग्राहेण यूथपतिरम्बुजहस्त आर्तः ॥ आहेदमादिपु
रुषाखिललोकनाथ तीर्थश्रवः श्रवणमंगलनामधेय ॥१५॥ श्रुत्वा हरिस्तमरणार्थिन
मप्रमेयश्चक्रायुधः पतगराजभुजाधिरूढः ॥ चक्रेण नक्रवदनं विनिपाट्य तस्माद्ध
स्ते प्रगृह्य भगवान् कृपयोज्जहार ॥१६॥ ज्यायान् गुणैरवरजोप्यदितेः सुतानां लो
कान् विचक्रम इमान्यदथाधियज्ञः ॥ क्ष्मां वामनेन जगृहे त्रिपदछलेन याञ्चामृते
पथि चरन् प्रभुभिर्न चाल्यः ॥१७॥

नां द्वादशादित्यानां मध्ये अधियज्ञः यज्ञाधिष्ठाता विष्णुः ॥ अवरजः कनीयानपि गुणैर्ज्यायान् ज्येष्ठः गुणै
र्न वा स्वयं यत् इमान् लोकान् विचक्रमे पदन्यासैः क्रान्तवान् ॥ अथ प्रतिश्रुतानन्तरमेव तत्र हेतुः बलेः
क्ष्मां वामनरूपेण जगृहे न त्वीश्वरः स्वयं किमिति तथा चक्रे ॥ तत्राह ॥ याञ्चां विना धर्ममार्गे वर्त्तमानो ॥ राम॰
न चाल्यः ऐश्वर्यान्न भ्रंशनीय इति ॥१७॥ ३३

एव

कूर्मावतारमाह॥ क्षीरोदधौ कच्छपवपुः॥ सन्गोत्रं मंथनार्थं मंदरगिरिं पृष्ठेन विधृतवान्॥ कदा॥ अमृतल-
ब्धये क्षीराब्धिमुन्मथ्नतां सतां निद्रायाः क्षणः अवसरः तत्स्वरो वा यस्य सः॥ निद्रावसरः कुतस्तत्राह॥ अद्रेः परि-
वर्त्तः परिभ्रमः॥ कषाणः कषणं चर्षणं सुखप्रदो यस्य सा कंडूर्यस्य सः॥ यद्वा अद्रिपरिवर्त्त एव कषः कषणं ते-

क्षीरोदधावमरदानवयूथपानामुन्मथ्नताममृतलब्धय आदिदेवः॥ पृष्ठेन कच्छ-
पवपुर्विदधार गोत्रं निद्राक्षणाद्रिपरिवर्त्तकषाणकंडूः॥ १३॥ त्रैविष्टपोरुभयहा-
सनाः सिंहरूपं कृत्वा भ्रमभ्रकुटिदंष्ट्रकरालवक्त्रं॥ दैत्येंद्रमाशु गदयाभिपतंतमा-
रादूरौ निपात्य विददार नखैः स्फुरंतं॥ १४॥ ॥ ॥

नऽपगत इति अपयातीति कषाणकंडूर्यस्य॥ १३॥ श्रीनृसिंहावतारमाह त्रैविष्टपा देवाः तेषामुरुभयं
हंतीति तथा स भगवान्॥ कथंभूतं भ्रमंत्यो भ्रकुट्यो दंष्ट्रा च यस्मिन् तत्करालं वक्त्रं यस्मिंस्तं दैत्ये-
द्रं स्फुरंतं आरात्समीप एव गदया उपलक्षितं अभिपतंतं तं नखैर्विददार॥ १४॥ ॥

देवे

अथवा त्रैविष्टपा देवाः हिरण्यकशिपोराज्यकाले तेषामुरुभयजनकोऽहासो यस्मिन् तत्रत्रैविष्टपोरुभयहासं चतन्नृसिंहरूपं कृत्वा २

तत्तन्मन्वंतरावतारमाह॥चक्रमिति॥स्वतेजःनिजंप्रभावमेवचक्रंसुदर्शनंबिभर्त्ति॥चक्रवदप्रतिहतंप्र
भावंबिभर्त्तीत्यर्थः॥तदेवाहमनुवंशपालकःसन्त्रयाणांलोकानांपद्येऽप्युपरिस्थितेसत्यलोकेपिकम
नीयांस्वकीर्त्तिंविस्तारयन्खलराजसुदंडंविधत्ते॥२०॥धन्वंतर्यवतारमाह॥लोकेअवतीर्यधन्वंतरिःस
न्पुरुरुजांमहारोगिणांस्वनाम्नैवरुजःरोगान्हंति॥स्वयमेवकीर्त्तिरितिकीर्त्त्यतिशयोक्तिः॥अम

चक्रंचदिक्ष्वविहतंदशसुस्वतेजोमन्वंतरेषुमनुवंशधरोबिभर्त्ति॥दुष्टेषुराजसुदमंव
दधात्स्वकीर्त्तिंसत्येत्रिपृष्ठउशतींप्रथयंश्चरित्रैः॥२०॥धन्वंतरिश्चभगवान्स्वयमेवकीर्त्ति
र्नाम्नानृणांपुरुरुजांरुजआशुहंति॥यज्ञेचभागममृतायुरवावरुंद्धआयुष्यवेदमनुशा-
स्त्यवतीर्यलोके॥२१॥क्षत्रंक्षयायविधिनोपभृतंमहात्माब्रह्मध्रुगुज्झितपथंनरकार्त्तिलिप्सु॥
उद्धंत्यसाववनिकंटकमुग्रवीर्यस्त्रिःसप्तकृत्वउरुधारपरश्वधेन॥२२॥

॥ १९ ॥ [illegible]

तंमरणशून्यमायुर्य
स्मात्सः॥अवअवरुन्धपर्वंदित्येःप्रतिरुद्धंयज्ञेभागंचअवरुंधेलेभतेअवापरुद्धमितिपाठेप्ययमेवा
र्थः॥आयुर्विषयंवेदंचानुशास्तिप्रवर्त्तयति॥२१॥परशुरामावतारमाह॥जगतःक्षयायविधिनादैवेनउप
भृतंसंवर्द्धितंमत्यवेसमर्पितमितिवा॥ब्राह्मणोभ्योद्रुह्यतीतितथा॥अतःउज्झितःपंथावेदमार्गोयेनअत
एवनरकार्त्तिलिप्सतीच॥एवंभूतमवनेःकंटकतुल्यंक्षत्रंअसौमहात्माहरिःउद्धंतिउत्पाटयतिदीर्घंती

ननु तर्हि याच्ञयापि छलनमनुचितमेवेत्याशंक्य ततोऽधिकं स्वसालोक्यादि दास्यामीत्याशयेन दत्तवा
नित्याह॥ नार्थ इति। यद्विबुधाधिपत्यं इदानीं बलात्प्राप्तं अग्रे दीयमानं च अयं बलेः पुरुषार्थो न भवति
कुतः उत्पतनाह आ अप इति छेदः॥ उरुक्रमस्य पादशौचं चरणक्षालनरूपा अपः आसर्वतो धृतवतः
क[illegible] शिखायां मूर्ध्नीत्यर्थः॥ किंच॥ गुरुणा वारितः शप्तोपि॥ अंग हे नारद॥ प्रतिश्रुतं विनान्यत्

नार्थो बलेरयमुरुक्रमपादशौचमापः शिखाधृतवतो विबुधाधिपत्यं॥ यो वै प्र
तिश्रुतमृतं न चिकीर्षदन्यत् आत्मानमंग शिरसा हरये भिमेने॥१८॥ तुभ्यं च ना
रद भृशं भगवान् विवृद्धभावेन साधु परितुष्ट उवाच योगं ज्ञानं च भागवतमात्म
सतत्त्वदीपं यद्वासुदेवशरणा विदुरंजसैव॥१९॥ ॥ ॥

तन्न चिकीर्षत् कर्तुं नैच्छत॥ पत्नीपपादपूरणार्थं हरये आत्मानं देहमपि अभिमेने अंगीकृतवान्॥
एवं सदेहं त्रैलोक्यं दद्याद् दत्तवतो विबुधाधिपत्यमर्थो न भवतीत्यर्थः॥१८॥ हंसावतारमाह तुभ्य
मिति॥ भृशं विवृद्धेन भावेन अनुवृत्त्या भक्त्या परितुष्टः सन् भक्तियोगं साधु यथा तथा उवाच॥
ज्ञानं चेति ज्ञानसाधनं॥ किं तत् भागवतं नाम॥ कथंभूतं तत्त्वमेव सतत्त्वं आत्मतत्त्वदीपकं॥ विवृद्ध
भावेनेति विशेषणात् फलमाह यदिति॥१९॥

भा०द्वि०
३५

किंच॥ युद्धे रावणस्य वक्षःस्थलस्पर्शेन रुग्णाभग्नायेमहेंद्रवाहस्यैरावतस्य दंताः तैर्विडंबिताः स्वधवलिम्नाधव
लीकृताः तच्छिन्नपतितैः प्रकाशिता इत्यर्थः॥ या एवंभूताः ककुभो दिशः ताः जुषते सेवते पालयतीति तथा तस्य दा
रहर्तुः रावणस्य अहो मत्समः कोन्योस्तीति महागर्वेण ऊढं प्राप्तं हासं असुभिः प्राणैः सह सद्यः शीघ्रं विनेष्यति
अपनेष्यति कैर्धनुषो विस्फूर्जितैः॥ टंकारघोषैरेव॥ कथंभूतस्य अधिसैन्ये स्वपरसैन्यमध्ये उच्चरतः उत्क

35

वक्षःस्थलस्पर्शरुग्णमहेंद्रवाहदंतैर्विडंबितककुब्जुष ऊढहासं॥ सद्योऽसुभिः सह विनेष्य
तिदारहर्तुर्विस्फूर्जितैर्धनुष उच्चरतोधिसैन्ये॥२५॥ भूमेः सुरेतरवरूथविमर्दितायाः क्लेश
व्ययाय कलया सितकृष्णकेशः॥ जातः करिष्यति जनानुपलक्ष्यमार्गः कर्माणि चात्ममहिमो
पनिबंधनानि॥२६॥

र्षेण विचरतः॥ ककुब्जय ऊढहास॥ मिति पाठे दंतैरुज्वलितानां ककुभां जयेन प्रोरूढहासः॥ संजातो गर्वः
तम् अपनेष्यतीत्यर्थः॥२५॥ श्रीकृष्णावतारमाह॥ भूमेरिति दशभिः सुरेतराः असुरांशसंभूताः राजानस्तेषां व
रूथैः सैन्यैर्विमर्दितायाः भारेण पीडितायाः कलया रामेण सह जातः सन् कोसौ जातः सितकृष्णौ केशौ यस्य
भगवतः स एव साक्षात्॥ सितकृष्णकेशत्वं शोभैव न तु वयःपरिणामकृतं॥ अविकारित्वात् यत्तु उक्तं विष्णु
पुराणे॥ उज्जहारात्मनः केशौ सितकृष्णौ

राम०
३५

सितकृष्णकेश
[illegible]शिव
विष्णुब्रह्माण
[illegible]
वार २

रामावतारमाह त्रिभिः अस्मदिति ॥ अस्माकं च ह्लादीनां प्रसादे सुमुखः कलया भरतादिरूपया सह कला
मायातस्याईशः गुरोर्दशरथस्याज्ञायां तिष्ठन् ॥ सीतालक्ष्मणाभ्यां सहितो वनमाविवेश ॥ यस्मिन् विरोधंकृ
त्वा रावणो नाशं प्राप्तः ॥ २३ ॥ यस्मै रामाय उदधिर्मार्गं ददौ ॥ सपदि शीघ्रं हरो यथा त्रिपुरं दिधक्षुः तद्वत् अरि

अस्मत्प्रसादसुमुखः कलया कलेश इक्ष्वाकुवंश अवतीर्य गुरोर्निदेशे ॥ तिष्ठन्वनं
सदयितानुज आविवेश यस्मिन्विरुध्य दशकंधर आर्त्तिमार्छत ॥ २३ ॥ यस्मा अ
दादुदधिरूढभयांगवेपो मार्गं सपद्यरिपुरं हरवद्दिधक्षोः ॥ दूरे सुहृन्मथितरो
षसुशोणदृष्ट्यातातप्यमानमकरोरगनक्रचक्रः ॥ २४ ॥ ॥ ॥

पुरं लंकां दग्धुमिच्छोः ॥ षष्ठी चतुर्थ्यर्थे यद्वा पंचमी यं ॥ दिधक्षो रामात् त्वयङ्गयं प्राप्तं तेनांगे कंपो यस्येति
कथंभूत उदधिः ॥ ऊढं प्राप्तं यद्भयं तेन अंगेषु वेपः कंपो यस्य ॥ अत्र हेतुः ॥ दूरे वर्त्तमाना सुहृत् सीता तया
निमित्तभूतया मथितः क्षुभितो रोषः तेन सुशोणः अत्यरुणा दृष्टिः तया आतप्यमानं मकराणामुरगाणां
नक्राणां च चक्रं यस्मिन् ॥ २४ ॥

भा॰ द्वि॰ ३६ विषतोयपीथान् विषमयतोयस्य पीथं पानं येषां ॥ पालान् गोपांश्च कृपादृष्टिसुधावृष्ट्या जीवयिष्यतीति यमुनायां क्री
३६ डन् उरगं कालियं उच्चाटयिष्यति ॥ तत्कुह्रदयेतस्या ह्रदस्य निर्विषत्वाय ॥ अतिविषवीर्याणां विलोलाश्चंचला जि
ह्वा यस्य ॥ २८ ॥ दिव्यमलौकिकं इवेति लोकोक्तिः उन्नेष्यति उद्धरिष्यति ॥ शुचिग्रीष्मतत्संबंधिनि वने शुष्के इत्य
र्थः ॥ अतो दावाग्नेर्हेतोः स्वसितो निश्चितो अंतकालो यस्य तं ॥ सबलः सरामः ॥ अधिगम्य दुर्ज्ञेयं वीर्यं यस्य ॥ तत्र २४

36

यद्वै व्रजे व्रजपशून्विषतोयपीथान्पालांस्त्वजीवयदनुग्रहदृष्टिवृष्ट्या ॥ तच्छुद्धयेतिविषवी
र्यविलोलजिह्वमुच्चाटयिष्यदुरगं विहरन्ह्रदिन्यां ॥ स्वतत्कर्म दिव्यमिव यन्निशि निःशयानं दा
वाग्निना शुचिवने परिदह्यमाने ॥ उन्नेष्यति व्रजमतोवसितांतकालं नेत्रे पिधाप्य सबलोनधिगम्य
वीर्यः ॥ २९ ॥ गृह्णीत यद्यदुपबंधममुष्य माता शुल्वं सुतस्य न तु तत्तदमुष्य माति ॥ यज्जृंभतोस्य
वदने भुवनानि गोपी संवीक्ष्य शंकितमनाः प्रतिबोधितासीत् ॥ ३० ॥ ॥ ॥

निशि निःशयानमिति कालियदमने रात्र्यां यमुनातीरे ॥ नेत्रे पिधाप्य पिहिते कारयित्वेति मुंजाटव्यामिति ज्ञेयं
॥ २९ ॥ उपबध्यते अनेनेति उपबंधं तत्साधनं शुल्वं दाम अमुष्य माता यशोदा अग्रहीत् ॥ अमुष्य न माति बंधनं सं
मितं न भवति न पर्याप्तं इत्यर्थः गोपी यशोदा संवीक्ष्य दृष्ट्वा प्रतिबोधिता निजैश्वर्यं ज्ञापिता आसीदिति य राम॰
तत्तत्कर्म दिव्यमिवेति सर्वत्र पूर्वेणैवान्वयः ॥ ३० ॥ ॥ ३६

महासुन इति । यच्च भारते । स चापि केशौ हरिरुद्बबर्ह शुक्लमेकमपरं चापि कृष्णं । तौ चापि केशावाविशतां य
दूनां कुले स्त्रियौ रोहिणीं देवकीं च । तयोरेको बलभद्रो बभूव योऽसौ श्वेतस्तस्य देवस्य केशः । कृष्णो द्वितीयः के
शवः संबभूव केशो योऽसौ वर्णतः कृष्ण उक्त इति । ननु न केशमात्रावताराभिप्रायं । किं तु भारावतारणरू
पं कार्यं कियदेतत् । सत्केशाविव तत्कर्तुं शक्ताविति द्योतनार्थं रामकृष्णयोर्वर्णसूचनार्थं च केशोद्धरणमि

तोकेन जीवहरणं यदुलूखलिकायास्त्रैमासिकस्य च पदा शकटोऽपवृत्तः । यद्रिङ्ग
तान्तरगतेन दिविस्पृशोर्वा उन्मूलनं त्वितरथार्जुनयोर्न भाव्यं ॥२७॥ ॥

निगम्यते । अन्यथा तत्रैव पूर्वापरविरोधापत्तेः । कृष्णस्तु भगवान् स्वयमित्येतद्विरोधाच्च । कथंभूतः परमे
श्वरतया जनैः । अनुपलक्ष्यो मार्गो यस्य तन्हीश्वरत्वे किं प्रमाणं । अतिमानुषकर्मान्यथानुपपत्तिरेवेत्याह
आत्मनो महिमा उपनिबध्यते । अभिव्यज्यते येषु तानि ॥२६॥ एतदेव प्रपंचयति । तोकेनेत्यादिना । बालेन
पूतनाया जीवहरणं । यत् रिंगता [illegible] जानुभ्यां गच्छता । अंतरगतेन मध्यं प्राप्तेन । दिविस्पृशोः अत्युच्च
योः । इतरथा अनीश्वरत्वे तन्न भवितव्यं ॥२७॥

भा॰द्वि॰ येचप्रलंबादयः तेसर्व्वेहरिणा हेतुभूतेनतदीयंनिलयं॥अदर्शनंदर्शनायोग्यंवैकुंठं अलंयास्यंती त्युत्तरेणान्व
३७ यः॥खरोधेनुकः दर्दुरंदुवदर्दुरोबकः॥इभःकुवलयापीडः कपिर्द्विविदः।कुजोनरकः॥३४॥येचमृधेआत्तचापाः
समितौसंग्रामेशालंतेश्लाघंतेसमितिशालिनः॥ननुप्रलंबखरकपिबल्वलरुक्मिप्रमुखा बलभद्रेणा
निहताः कंबोजादयश्चभीमार्जुनादिभिः॥शंबरःप्रद्युम्नेन यवनोमुचुकुंदेनननुहरिणातत्राह॥बलेभी

37 येचप्रलंबखरदर्दुरकेश्यरिष्टमल्लेभकंसयवनाःकुजपौंड्रकाद्याः॥अन्येचशाल्वकपिबल्वल
दंतवक्रसप्तोक्षशंबरविदूरथरुक्मिमुख्याः॥३४॥येवामृधेसमितिशालिनआत्तचापाःकांबो
जमत्स्यकुरुकेकयसृंजयाद्याः॥यास्यंत्यदर्शनमलंबलभीमपार्थव्याजाह्वयेनहरिणा
निलयंतदीयं॥३५॥कालेनमीलितधियामवमृश्यनॄणांस्तोकायुषांस्वनिगमोबतदूरपारः
आविर्हितस्त्वनुयुगंसहिसत्यवत्यांवेदद्रुमंविटपशोविभजिष्यतिस्म॥३६॥ ॥

मःपार्थइत्यादयोव्याजाह्वयाःकपटनामानियस्यतेन॥सप्तोक्षाणस्तुतेनदमिताः कालांतरेयास्यंती
तिभावः॥एतच्चसर्वमपिकर्मदिव्यमिवतत्त्वान्यथानभाव्यमितिपूर्वेणैवसंबंधः॥३५॥व्यासावता
रमाह॥अनुयुगंमीलितासंकुचिताधीर्येषांतेषांस्वनिगमःस्वकृतोवेदराशिः बतअहो दूरेपारंय राम॰
स्येतिदुर्गमइत्यवमृश्य सत्यवत्यामाविर्भूतः सन्सएवहरिःविटपशःशाखाभेदेन॥३६॥रामरा ३७

वरुणस्यपाशात्यद्भयंतस्मान्मोचयिष्यति॥मयसूनुनाव्योमनाम्ना॥आपतंव्यापतंनिशिशयानमितिचवै
कुंठप्राप्तिसाधानानुष्ठानाभावोदर्शितः उपनेष्यति प्रापयिष्यति॥गोकुलवासिनंजनं॥स्मेत्पाश्चर्ये ३१
देवेंद्रेपर्जन्ये निरस्तुः रिरक्षिषुत्पर्यः अनघेश्मरहितेएकस्मिन्नेवकरेसलीलं यथातथामही

नंदंचमोक्ष्यतिभयाद्वरुणस्यपाशाद्गोपान्बिलेषुपिहितान्मयसूनुनाच॥अद्यापतंनिशि
शयानमतिश्रमेणालोकेविकुंठ उपनेष्यतिगोकुलस्य॥३१॥गोपैर्मखेप्रतिहतेव्रजविप्ल
वायदेवेऽभिवर्षतिपशून्कृपयारिरक्षुः॥धर्त्तोच्छिलिंध्रमिवसप्तदिनानिसप्तवर्षो
महीध्रमनघैककरेसलीलं॥३२॥क्रीडिष्यन्निशिनिशाकररश्मिगौर्यांरासोन्मुखःक
लपदायतमूर्च्छितेन॥उद्दीपितस्मररुजांव्रजभृद्वधूनांहर्तुर्हरिष्यतिशिरोधनदानुगस्य॥३३

धृंगोवर्द्धनंधर्त्ताधारयिष्यति उच्छिलिंध्रंउच्छत्रंकवाकमिव॥सप्तवर्षाणिवयोयस्यसः॥३२॥निशिरा
त्रौनिशाकररश्मिभिःगौर्यांधवलायांवनेक्रीडन्कलानिमंजुलानिपदानियस्मिंस्तेनतत्॥
आपतंदीर्घमूर्च्छितंआलापविशेषयुक्तंगीतंतेनउद्दीपितःस्मरएववरुक्ययासांगोपीनांहर्तुः
शंखचूडस्यशिरोहरिष्यति॥३३॥

भा·द्वि· इदंमयासंक्षेपेणोक्तं विस्तरेणावक्तुंनकोपिसमर्थइत्याह ॥ पृथिव्याःपरमाणुनपियो विममेगणितवान्त
३८ दशोपिकोपिविष्णोर्वीर्यगणनांकर्तुमर्हति ॥ कथंभूतस्ययो विष्णुःत्रिपृष्ठंसत्यलोकंचस्कंभधृतवान्
ल किमितिचस्कंभयस्मात्त्रैविक्रमे अस्खलितापतिघातरंहसास्वपादवेगेनत्रिसाम्यरूपंस
दनमधिष्ठानंतस्मादारभ्यउरु अधिकंकंपयानंकंपेनयानंयस्येतिवा ॥ अतःकारणाच्चस्कंभ ॥ आत्रिपृ

त्रयाणांछगणानांसाम्यंयस्मिन् रजआदयः ब्रह्मपदंनामानाम प्रलांगरवहिःसर्वोपरिमायायाआवरणावर्त्तितेनशोभिव्याप्

३८ विष्णोर्नुवीर्यगणनांकतमोर्हतीहयःपार्थिवान्यपिकविर्विममेरजांसि ॥ चस्कंभयःस्वरं
हसास्खलतात्रिपृष्ठंयस्मात्त्रिसाम्यसदनादुरुकंपयानं ॥ ४० ॥ नांतंविदाम्यहममीमुनयो
ग्रजास्तेमायाबलस्यपुरुषस्यकुतोपरेये ॥ गायन्गुणान्दशशताननआदिदेवः शेषो
धुनापिसमवस्यतिनास्यपारं ॥ ४१ ॥

ष्ठमितिवाच्छेदः सत्यलोकमभिव्याप्यप ॥ सर्वंधृतवानित्यर्थः ॥ तथाचमंत्रः ॥ विष्णोर्नुकमिति ॥ अस्यार्थः विष्णो
र्नुवीर्याणिकंप्रवोचंकः प्रावोचदित्यर्थः यःपार्थिवानिरजांस्यपिविममेसोपि ॥ योविष्णुःत्रेधाविचक्रमा
णः त्रिविक्रमंकुर्वन्नुत्तरंलोकं अस्कंभयत् अवष्टब्धवान् कथंभूतंसधस्थं ॥ सहस्यसधादेशः तिष्ठं
तीतिस्थाः तत्रस्थैर्देवैः सहवर्त्तमानमित्यर्थः ॥ ४० ॥ एतत्प्रपंचयति ॥ नांतमिति ॥ पुरुषस्ययन्मायाब
लंतस्यांतंनविदामिनवेद्मि । दशशतान्याननानियस्यसोपिअस्यगुणान्गायन्पारंनसमवस्यति

राम·
३८

बुद्धावतारमाह ॥ देवद्विषांनिश्चितानांनितरांस्थितानांतद्बलेनचपूर्भिः पुरीभिः ॥ अदृश्यपतूर्भिः अल
क्ष्यवेगाभिर्मतेर्विमोहः योगपतात्पागोयस्मात् ॥ मतेः प्रलोभश्च अयुक्तस्वीकारोयस्मात्तंपाषंडवेषं
विधायतेनऔपधर्म्यपाषंडधर्मंस्वार्थेष्यजनबहु भाषिष्यतइत्यर्थः ॥ ३७ ॥ कल्क्यवतारमाह ॥ यर्हिय
दासतामप्यालयेषुगृहेषुनैवर्णीकाः पाषंडिनः स्युः शुद्राश्चराजानः स्युः तदाकाल्किरूपेणकलेः

देवद्विषांनिगमवर्त्मनिनिष्ठितानांपूर्भिर्मयेनविहिताभिरदृश्यपतूर्भिः ॥ लोकान्घ्नतां
मतिविमोहमतिप्रलोभंवेषंविधायबहुभाष्यतऔपधर्म्यं ॥ ३७ ॥ यर्ह्यालयेष्वपिसतां
नहरेः कथाः स्युः पाषंडिनोद्विजजनावृषलानदेवाः ॥ स्वाहास्वधावषडितिस्मगिरोन
यत्रशास्ताभविष्यतिकलेर्भगवान्युगांते ॥ ३८ ॥ सर्गेतपोहमृषयोनवयेप्रजेशाः स्थानेच
धर्ममखमन्वमरावनीशाः ॥ अंतेत्वधर्महरमन्युवशासुराद्यामायाविभूतयइमाः पुरुशक्तिभा
जः ॥ ३९ ॥

शास्ताभविष्यति ॥ अत्रचब्रह्मनारदसंवादात्प्राग्भाविनोवराहादयः ॥ मन्वंतरावतारास्तुभूताभाविन
श्च ॥ धन्वंतरिपरशुरामौतदावर्तेते ॥ श्रीरामादयस्तुभाविनः ॥ तत्रतुक्वचिद्भूतादिनिर्देशः क्वदसइति
द्रष्टव्यं ॥ ३८ ॥ सृष्ट्यादिकार्यभेदेनमायागुणावतारविभूतीराह सर्गइतिस्थानेस्थितौमखोविष्णुः ॥ धर्मश्च
मखश्चमनवश्च [illegible] अमराश्चावनीशाश्च ॥ अंतेसंहारेहरो रुद्रः मन्युवशाः सर्प्पाः बहुशक्तिधारि

भा॰ स॰ भागवतदशमिकृतयः ॥३४॥

भा॰द्वि॰ ३९ किंबहुना संगेन सर्वेपि विदंतीत्याह ॥ ते वा इति अद्भुतः क्रमः पादन्यासो यस्य हरेस्तत्परायणास्तद्भक्ताः
तेषां शीलं शिक्षा येषां ते तथा यदि भवंति तर्हि ते पि विदंतीत्यर्थः ॥ श्रुते भगवतो रूपे धारणा मनो निय
मनं येषां ते विदंतीति किमु वक्तव्यं ॥ ४६ ॥ किं तद्भगवतः स्वरूपं यस्मिन्मनोधारणं विधाय मायां तरंतीत्यपे
क्षायामाह ॥ शश्वदिति द्वाभ्यां यद्ब्रह्मेति विदुर्मुनयः तद्धि भगवतः स्वरूपं किं तद्ब्रह्म तदाह ॥ अज
स्रं नित्यं च तत्सुखं च विशोकं चेति ॥ अजस्रसुखत्वे हेतुः शश्वत्सदा प्रशांतं अतो नित्यसुखरूपं ॥
विशोकत्वे हेतुः अभयं कुतः यतः सर्वभेदशून्यं अतो भयं द्वितीयाद्वै भयं भव द्वितीया
तीति श्रुतेः ॥ तत्कुतः यतः प्रतिबोधमात्रं ज्ञानैकरसं ॥ ननु ज्ञानस्यापि नीलपीताद्याकारेण चक्षुरादिक
39 रणभेदेन च भेदो दृश्यते ॥ नेत्याह शुद्धं निर्मलं ॥ ननु दर्शितो विषयकरणोपरागरूपो मलस्तत्राह ॥ स

ते वै विदंत्यतितरंति च देवमायां स्त्रीशूद्रहूणशबरा अपि पापजीवाः ॥ यद्यद्भुतक्रमपरायणशी
लशिक्षास्तिर्यग्जना अपि किमु श्रुतधारणा ये ॥ ४६ ॥ शश्वत्प्रशांतमभयं प्रतिबोधमात्रं शुद्धं समं
सदसतः परमात्मतत्त्वं शब्दो न यत्र पुरुकारकवान् क्रियार्थो माया परैत्यभिमुखे च विलज्जमाना ॥ ४७

दसतः परं विषयकरणसंगशून्यं प्रत्यक्तेर्वेव न तु पराग् न ज्ञानस्य प्रतिभावः ननु तथापि ज्ञातृत्वात् भेदः स्या
त् ॥ न आत्मतत्त्वं आत्मनो ज्ञातुः स्वरूपमेव तत्तु न ततो भिन्नं ननु च तत्त्वोपनिषदं पुरुषं पृच्छामीति शब्द
बोध्यत्वप्रतीतेः कुतो बोधरूपत्वं तत्राह ॥ शब्दो न यत्रेति ॥ आरोपितनिवृत्तावेव शब्दस्य व्यापारो न
तु बोध इत्यर्थः ॥ ननु च भवतु नाम निरस्तभेदज्ञानरूपत्वाद्विशोकत्वं ॥ सुखस्य तु नानाकारकसा
ध्यक्रियाफलत्वात्कथमजस्रसुखत्वं तस्य तत्राह ॥ यत्र च पुरुकारकसाध्यः क्रियार्थः ॥ उत्पाद्याप्य
विकार्यसंस्काररूपं चतुर्विधं क्रियाफलं नास्ति इडियेज्ञानाशाभिव्यक्तिरेव क्रियाभिरानंदांशाभिव्य राम
क्तिमात्रं क्रियते नोत्पत्त्यादिकमिति भावः ॥ ननु तथाप्यघभावेपि मायामलापकरणं क्रियापत्त्वं स्यादेव व्री ३९
हिता मिव तु पापाकरणात् तत्पाश्वाह ॥ माया अभिमुखे स्थातुं विलज्जमानैव यस्मात्परैति दूरतो

यदि न कोपि विदंतितर्हि कथं मुच्येरन्तत्र कृपयैवेत्याह। येषामिति दययेत्तद्दयां कुर्यात्तेचयदि
निःकपटं आश्रितचरणाभवंतितेदुस्तरांदेवमायांअतितरंति। चकारात्मायावैभवंविदंतिचत्र
थैतिवापाठः। एतदेवतेषांमायातरणमित्याह। नैषामितिश्वसृगालानांभक्ष्येदेहे॥४२॥ अंतज्ञा

येषांसएवभगवानदययेदनंतः सर्वात्मनाश्रितपदोयदिनिर्व्यलीकं॥ तेदुस्तरामतित
रंत्यपदेवमायांनैषांममाहमितिधीःश्वसृगालभक्ष्ये॥४२॥ वेदाहमंगपरमस्यहियोगमायां
यूयंभवश्चभगवानथदैत्यवर्यः॥ पत्नीमनोःसचमनुश्चतदात्मजाश्चप्राचीनबर्हिर्ऋभुरं
गउतध्रुवश्च॥४३॥ इक्ष्वाकुरैलमुचुकुंदविदेहगाधिरघ्वंबरीषसगरागयनाहुषाद्याः॥ मां
धात्रलर्कशतधन्वनुरंतिदेवदेवव्रतोबलिरमूर्त्तरयोदिलीपः॥४४॥ सौभर्युतंकशिबिदेव
लपिप्पलादाःसारस्वतोद्धवपराशरभूरिषेणाः॥ येन्येविभीषणहनूमदुपेंद्रदत्तपार्थार्ष्टिषे
णविदुरश्रुतदेववर्याः॥४५॥
नाभावेपिमायेयमितिज्ञानंतत्रकृपयाबहूनामस्तीत्याहवेदा
कादी हमितित्रिभिः। यूयमितिसनंदनादिभिर्बहुत्वं॥ दैत्यवर्यःप्रल्हादःमनुःस्वायंभुवःतस्यपत्नीचत
दात्मजाःपुत्रौकन्याश्च॥ प्राचीनबर्हिषाविसर्गलोपश्छांदसः॥४३॥ शतधनुःअनुश्चसंधिरार्षः
रंतिदेवाःपाठःसुगमः। ऐकपद्येएतेःसद्भिनोदेवव्रतइत्यर्थः॥४४॥ उपेंद्रदत्तःशुकःविभीषणादयोव

भा॰ द्वि॰ एवंतावदजस्यसुखंविशोकंचब्रह्मैवभगवतःस्वरूपंतत्प्राप्तानांचनप्राप्यंकृतंवाकिंचिदस्तीत्युक्तं॥इदानींततः
४० प्राक्सएवसर्वफलदातासर्वकर्मप्रवर्तकश्चेत्याह॥सएवश्रेयसांफलानांविभुःदातापितत्रहेतुः॥भावना
ब्राह्मणादीनांस्वभावैःशमदमादिभिर्विशेषणोविहितस्यसतःशुभस्यकर्मणोयतःप्रवर्त्तकात्प्रसिद्धिः॥यद्वा
भावानांमहदादीनांस्वभावेनपरिणामेनविहितस्यसतःकार्यस्यप्रसिद्धिः॥सएवस्वर्गादीनांदातेत्यर्थः॥
ननुकर्मकर्तुर्मृतस्यकथंस्वर्गादिफलंस्यात्तत्राह॥स्वारंभकधातूनांभूतानांविगमेवियोगेसतिअनुविशी
40

सश्रेयसामपिविभुर्भगवान्यतोस्यभावस्वभावविहितस्यसतःप्रसिद्धिः॥देहेस्वधातुविग
मेनुविशीर्यमाणेव्योमेवतत्रपुरुषोनविशीर्यतेजः॥४९॥सोयंतेभिहितस्तातभगवान्वि
श्वभावनः॥समासेनहरेर्नान्यदन्यस्मात्सदसच्चयत्॥५०॥इदंभागवतंनामयन्मेभगवतो
दितं॥संग्रहोयंविभूतीनांत्वमेतद्विपुलीकुरु॥५१॥

र्यमाणेपिदेहेतत्रस्थंव्योमेवयस्तेन
सहनविशीर्यते॥यतःअजस्तेनसहनजातः॥तस्यपुरुषस्यश्रेयसांप्रभुरित्यर्थः॥४९॥अध्यायत्रयस्या
र्थमुपसंहरति॥सोयंतेसमासेनसंक्षेपेणाभिहितः॥तमेवाह॥सदसत्कार्यंकारणंचहरेरन्यन्नभव
ति॥ननुहरेस्तद्व्यतिरेकेतद्गतविकारप्रसंगःस्यात्॥नअन्यस्मात्कारणभूतोहरिःकार्यव्यतिरिक्त राम॰
इत्यर्थः॥५०॥अयंचविभूतीनांसंग्रहउदितः॥५१॥ ॥ ॥ ४०

यस्मादेवंभूतेभगवतिनियमितमनसांकृतार्थानांनकिमपिकृत्यमस्तीत्याह॥सध्र्यंचतीतिसध्र्य
क्सह चरंमनः यम्यतिनियम्ययस्मिन् स्थिरीकृत्ययतयः यत्नशीलाः॥कर्त्तोभेदः तन्निरासो
कर्त्तः तन्नहेतिंसाधनंजह्युः त्यजेयुः॥अनुपयोगात्तन्नाद्रियतइत्यर्थः॥उपयोगाभावेनसा

तद्वैपदंभगवतःपरमस्यपुंसोब्रह्मेतियद्विदुरजस्रसुखंविशोकं॥
सध्र्यङ्नियम्ययतयोयमकर्त्तहेतिंजह्युःस्वराडिवनिपानखनित्रमिंद्रः॥
॥४८॥

धनानादरेदृष्टांतः निपीयतेस्मिन्निति निपानंकूपः तस्यखनित्रंखननसाधनंयथास्वराट्स्व
यमेवपर्जन्यरूपेणविराजमानइंद्रोनादत्तेतद्वदिति॥यद्वा॥स्वेनैवराजतइतिस्वराट्दरि
द्रःसयथाइंद्रःसमृद्धःसन्कर्मकारदशायांगृहीतंनिपानखनित्रंजहातितद्वदित्यर्थः॥४८॥

भावसरोरुहं हृदयकमलं प्रविष्टः तद्गतं सर्वं मलं धुनोति ॥ सलिलस्येति दृष्टांतरमामिश्रणादिना कुंभ
स्थजललेशो धितेतदेव केवलं शुध्यति ॥ नतु नदीतडागादिगतं ॥ स च मलः कुंभस्थातस्तिष्ठत्येव न तु स
र्वथा विलीयते ॥ अत एव किंचिच्चलनेन पुनः क्षुभ्यति च ॥ एवं तपोदानादिप्रायश्चित्तेन सर्वथा स
र्वेषां सर्वपापं धुनोति किंतु सावशेषं तच्चकस्याचदेव किंचिदेव हृदि प्रविष्टमात्रस्तु श्रीकृष्णः सर्वे

प्रविष्टः कर्णरंध्रेण स्वानां भावसरोरुहं ॥ धुनोति शमलं कृष्णः सलिलस्य यथा शरत् ॥५॥
धौतात्मा पुरुषः कृष्णपादमूलं न मुंचति ॥ मुक्तसर्वपरिक्लेशः पांथः स्वशरणं यथा ॥६॥
यदधातुमतो ब्रह्मन् देहारंभोऽस्य धातुभिः ॥ यदृच्छया हेतुना वा भवंतो जानते यथा ॥७॥

षां सर्वपापं निःशेषं हरतीत्यनेन दृष्टांतेनोक्तं सलिलस्य मलं यथा शरदिति ॥५॥ ततश्च कृतार्थो भव
तीत्याह धौतात्मा निःपापः ॥ मुक्ताः सर्वे रागद्वेषादयः परिक्लेशा येन पांथः प्रवासादागतः स्वशरणं
गृहं यथा न मुंचति तद्वत् ॥६॥ तदेवं श्रवणं सुकमाविः कृत्य संदिग्धानर्थान् पृच्छति अधातु
मतः धातवो भूतानि ॥ तत्संबंधशून्यस्य अस्य लौकिकस्यात्मनः धातुभिर्देहारंभ इति यत् एतत्
किं यदृच्छया निमित्तहेतुना वा कर्मादिना भवंतो यथावज्जानंति अतः कथयंत्विति शेषः ॥७॥

यथावर्णितेन नृणां भक्तिर्भविष्यत्येवं संकल्प्य संचिंत्य तथा हरिलीलाप्राधान्येन श्रीभागवतं वर्णय ॥ ननु भक्तिर
सविघातेन केवलं तत्त्वमित्यर्थः ॥ ५२ ॥ ननु लीला मायाश्रया कितद्वर्णनेनेत्यत आह ॥ मायामिति ॥ ५३ ॥ इति द्वितीये
यसप्तमः ॥ ७ ॥ अष्टमे देहसंबंधमाक्षिपन्नीशजीवयोः ॥ बहून्नपरीक्षिदापृच्छत्पुराणार्थान्बुभुत्सितान्

यथा हरौ भगवति नृणां भक्तिर्भविष्यति ॥ सर्वात्मन्यखिलाधारे इति संकल्प्य वर्णय ॥ ५२ ॥ मा
यां वर्णयतोमुष्य ईश्वरस्यानुमोदतः ॥ शृण्वतः श्रद्धया नित्यं माययात्मा न मुह्यति ॥ ५३ ॥ इति
श्रीभागवते महापुराणे द्वितीयस्कंधे ब्रह्मनारदसंवादे सप्तमोध्यायः ॥ ७ ॥ श्रीराजोवाच
ब्रह्मणा चोदितो ब्रह्मन्गुणाख्यानेऽगुणस्य च ॥ यस्मै यस्मै यथा प्राह नारदो देवदर्शनः ॥ १ ॥ ए
तद्वेदितुमिच्छामि तत्त्वं वेदविदां वर ॥ हरेरद्भुतवीर्यस्य कथा लोकसुमंगलाः ॥ २ ॥ कथयस्व
महाभाग यथाहमखिलात्मनि ॥ कृष्णे निवेश्य निःसंगं मनस्त्यक्ष्ये कलेवरं ॥ ३ ॥ शृण्वतः श्रद्ध
या नित्यं गृणतश्च स्वचेष्टितं ॥ कालेन नातिदीर्घेण भगवान्विशते हृदि ॥ ४ ॥ ॥

त्वमेतद्विपुलीकुर्वित्युक्तं ॥ तदेव विपुलीकरणं पृच्छति ब्रह्मणेति त्रिभिः ॥ अगुणस्य गुणातीतस्या
पि ॥ देववद्दर्शनं यस्य सः ॥ १ ॥ ३ ॥ निःसंगं मनः श्रीकृष्णे निवेश्येति स्वप्रयत्नो दर्शितः ॥ सोपि श्रद्ध
या शृण्वतो नावश्यक इत्याह शृण्वत इति ॥ स्वप्रयत्नं विना भगवान्स्वयमेव हृदि विशति ॥ ४ ॥

भा·द्वि· प्रश्नांतरमाह पुरुषस्यावयवैः पूर्वं कल्पिताः यस्यैहावयवैर्लोकान्कल्पयंतीत्यादौ लोकैश्चामुष्यावयवाइतिपा
४२ तालमेतस्य हि पादमूलमित्यादौ चत्वमुखाच्छ्रुतवंतोचयं॥११॥ एवं संदेहविपर्ययाभ्यां पप्रच्छइदानीमज्ञातान्ब
हूनर्थान्पृच्छति यावानित्यादिना कल्पो महान् विकल्पोऽवांतरः भूतादिशब्दो यस्मात्॥ यस्य वाचकइतिवा
सतः स्थूलदेहाभिमानिनो मनुष्यपितृदेवतादेः आयुषः प्रमाणं॥११॥ अनुमानप्रकारः पृष्टः॥१२॥ विशेषं पृच्छति

42 यावान्कल्पो विकल्पो वा यथा कालोनुमीयते॥ भूतभव्यभवच्छब्द आयुर्मानं च यत्सतः॥१२॥ कालस्या
नुगतिर्यातु लक्ष्यतेऽण्वी बृहत्यपि॥ यावत्यः कर्मगतयो यादृशीर्द्विजसत्तम॥१३॥ यस्मिन्कर्मसमा
वायो यथा येनोपगृह्यते॥ गुणानां गुणिनां चैव परिणाममभीप्सतां॥१४॥ भूपातालककुब्व्योमग्र
हनक्षत्रभूभृतां॥ सरित्समुद्रद्वीपानां संभवश्चैतदोकसां॥१५॥ प्रमाणमंडकोशस्य बाह्याभ्यं
तरभेदतः॥ महतां चानुचरितं वर्णाश्रमविनिश्चयः॥१६॥

कालस्येति॥ अनुगतिः प्रवृत्तिः॥ कर्म
गतयः कर्मप्राप्या निस्थानानि यादृशीः॥ यादृश्यः॥१३॥ गुणानां सत्वादीनां परिणामं देवादिरूपमि· राम·
च्छतां गुणिनां जीवानां मध्ये यस्मिन्नुपरिणामे कर्मणां पुण्यपापानां समवायः समुदायः॥ केन कर्म ४२
समुदायेन कथं कृतेन को धिकारी देवादिभावं प्राप्नोतीत्यर्थः॥१४॥ भूरादीनां संभव एतान्निकेतनासि
येषां प्राणिनां तेषां च संभवः यश्चेति सर्वत्रानुषंगः॥१५॥ वर्णानामाश्रमाणां च विनिश्चयः तत्तत्स्वभावैर्निर्धारः॥१६॥

यश्चासावीश्वरः सोप्येतत्तुल्यदेहवान्प्रोक्तः अतस्तस्य को विशेष इत्याशयेन पृच्छति ॥ आसीदिति सार्द्धेन लो
कानां संस्थानं रचना तदेव लक्षणं स्वरूपं यस्य तत्पद्मं यस्योदरात् आसीत् ॥ असावीश्वरः इयत्ता पुंक्तैः स्वप
रिमितैरवयवैरयं लौकिकः पुरुषो यावान्यत्संख्याकावयवकः तावान्प्रोक्तः संस्थावान् अवयववानि
व च प्रोक्तः अतः को विशेषस्तस्येति ॥ ८ ॥ अवश्यं च विशेषो वाच्य इत्याह ॥ अजो ब्रह्मा भूतानां व्यष्ट्युपाधी

आसीद्यदुदरात्पद्मं लोकसंस्थानलक्षणं ॥ यावानयं वै पुरुष इयत्तावयवैः पृथक् ॥ तावा
नसाविति प्रोक्तः संस्थावयववानिव ॥ ८ ॥ अजः सृजति भूतानि भूतात्मा यदनुग्रहात् ॥ ददृ
शे येन तद्रूपं नाभिपद्मसमुद्भवः ॥ ९ ॥ स चापि यत्र पुरुषो विश्वस्थित्युद्भवाप्ययः ॥ मुक्त्वात्म
मायां मायेशः शेते सर्वगुहाशयः ॥ १० ॥ पुरुषावयवैर्लोकाः सपालाः पूर्वकल्पिताः ॥ लोकैरमु
ष्यावयवाः सपालैरिति शुश्रुम ॥ ११ ॥

नामात्मा नियंता समष्ट्युपाधित्वात् ॥ येन च अनुग्रहेण तानस्य रूपं ददृशे दृष्टवान् ॥ एतच्च तस्यापि दुरुरीश
स्य कूटस्थस्याखिलात्मनः सृज्यं सृजामि सृष्टोहमीक्षयैवाभिचोदित इत्यादिना चोक्तमनूद्यते अग्रे तु स्प
ष्टं भविष्यति ॥ ९ ॥ प्रश्नांतरमाह ॥ स चापीति ॥ यत्र शेते येन रूपेणावति यत्ते विश्वस्य स्थित्यादयो यस्मा
त् ॥ एवमादिप्रश्नानां तत्त्वतोर्हस्युदाहर्तुमिति सर्वत्र क्रियायाः संबंधः ॥ १० ॥ ॥

अनुशायिनांलीनोपाधीनांजीवानां॥ आत्मनोजीवस्यव्यवस्थानं। बंधमोक्षातिरिक्तस्वरूपेणावस्थानं॥२२॥ उदास्ते
प्रलये॥२३॥ चशब्दादपृष्टमपि॥२४॥ प्रमाणंसम्यक्ज्ञाता॥ यतस्त्वंचब्रह्मनारदव्यासक्रमेणसंप्रदायोस्तीति
सामान्यन्यायेनाह। परेचेति। यद्यात्वदन्येप्रायशोगतानुगतिकाएवनतत्त्वविदइत्याह॥ परेचेति॥२५॥ ननुत

यश्चानुशायिनांसर्गः पाषंडस्यचसंभवः॥ आत्मनोबंधमोक्षौचव्यवस्थानंस्वरूपतः॥२२॥ य
थात्मतंत्रोभगवान्विक्रीडत्यात्ममायया॥ विसृज्यवायथामायामुदास्तेसाक्षिवद्विभुः॥२३॥
सर्वमेतच्चभगवान्पृच्छतोमेनुपूर्वशः॥ तत्त्वतोर्हस्युदाहर्तुंप्रपन्नायमहामुने॥२४॥ अत्रप्र
माणंहिभवान्परमेष्ठीयथात्मभूः॥ परेचेहानुतिष्ठंतिपूर्वेषांपूर्वजैःकृतं॥२५॥ नमेसवःप
रायंतिब्रह्मन्ननशनादमी॥ पिबतोच्युतपीयूषमन्यत्रकुपिताद्द्विजात्॥२६॥ सूतउवाच॥
सउपामंत्रितोराज्ञाकथायामितिसत्पतेः॥ ब्रह्मरातोभृशंप्रीतोविष्णुरातेनसंसदि॥२७॥ प्राह
भागवतंनामपुराणंब्रह्मसंमितं॥ ब्रह्मणेभगवत्प्रोक्तंब्रह्मकल्पउपागते॥२८॥ रामरा

वानशनद्विजकोपाभ्यांव्याकुलस्यकुतःश्रवणंतत्राहनेति॥ नपरायंतिनापगच्छंतिनव्याकुलीभवं
तीत्यर्थः॥ अच्युतकीर्तिपीयूषंपिबतः॥२६॥ उपामंत्रितःपृष्टः॥ संसदिसौपतिश्रुतस्य॥२७॥ ब्रह्मकल्पेसृष्ट्यु
पक्रमकल्पे॥ भागवताख्यानेनैवप्रश्नानामुत्तरंदातुमुपक्रांतवानित्यर्थः॥२८॥ ॥

युगेयुगेप्रतियुगंयोधर्मः यच्चहरेरवतारानुचरितं ॥१७॥ सविशेषः वर्णाश्रमनिबंधनः श्रेणीनांतत्तत्व्यवसा
योपजीविनां ॥ व्यवहारनियमलक्षणोधर्मः ॥ राजर्षीणांप्रजापालनाधिकारिणां ॥ कृच्छ्रेषुआपत्सुजीवतां ॥१८
सर्वेषांतत्वानांप्रकृत्यादीनांपरिसंख्यानंसंख्यालक्षणंस्वरूपंहेतुतोलक्षणं तत्तत्कार्यहेतुत्वेनचलक्षणमभि
त्यर्थः ॥ पुरुषाराधनस्यविधिःदेवपूजाप्रकारः अष्टांगयोगस्यचविधिः ॥१९॥ योगेश्वराणामैश्वर्याणामणिमा

अवतारानुचरितंपदाश्चर्यतमंहरेः ॥ युगानियुगमानंचधर्मोयश्चयुगेयुगे ॥१७॥ नृणांसाधा
रणोधर्म्मःसविशेषश्चयादृशः ॥ श्रेणीनांराजर्षीणांचधर्म्मःकृच्छ्रेषुजीवतां ॥१८॥ तत्वानांपरिसं
ख्यानंलक्षणंहेतुलक्षणं ॥ पुरुषाराधनविधिर्योगस्याध्यात्मिकस्यच ॥१९॥ योगेश्वरैश्वर्यगति
र्लिंगभंगस्तुयोगिनां ॥ वेदोपवेदधर्माणामितिहासपुराणयोः ॥२०॥ संप्लवःसर्वभूतानांविक्र
मःप्रतिसंक्रमः ॥ इष्टापूर्त्तस्यकाम्यानांत्रिवर्गस्यचयोविधिः ॥२१॥

दिनाअर्चिरादिर्गौंलिंगश तिः
रीरस्यभंगःप्रलयः ॥ वेदाऋग्वेदादयः ॥ उपवेदाआयुर्वेदादयः धर्माधर्मशास्त्राणितेषां ॥ इतिहासपु
राणयोश्चगतिःस्वरूपं ॥२०॥ संप्लवः ॥ अवांतरप्रलयः ॥ यद्वा ॥ सम्यक्प्लवनंउद्भवः ॥ विक्रमःस्थि
तिःप्रतिसंक्रमोमहाप्रलयः इष्टंवैदिकंकर्म ॥ पूर्त्तंस्मार्त्तं ॥ वापीकूपतडागादिदेवतायतनानिचअ
न्नप्रदानमारामपूर्त्तमित्यभिधीयतइति तत्रचकाम्यानामग्निहोत्रादीनांविधिः अविरोधप्रकारः ॥२१॥

भा·द्वि ४४ यत्रोक्तं। परमेश्वरस्यापि देहसंबंधाविशेषात् कथं तद्भक्त्या मोक्षः स्यादिति। आसीद्यदुदरात्पद्ममित्यादिना। तत्रा
ह। आत्मनो जीवस्य तत्त्वविशुद्ध्यर्थं तत्त्वज्ञानार्थं तद्भवत्येव। किं तत्। यत्तपआदिना भजनं भगवान्ब्रह्मणे आ
ह। किं कुर्वन् ऋतं सत्यं चिद्घनं रूपं दर्शयन्। दर्शने हेतुः। अव्यलीकेन व्रतेन तपसा आदृतः सेवितः सन्। अ
यं भावः। जीवस्याविद्यया मिथ्यारूपदेहसंबंधः। ईश्वरस्य तु योगमायया चिद्घनलीलाविग्रहाविर्भाव इ
तिमहान्विशेषः। अतस्तद्भजनान्मोक्षोपपत्तिरिति। ४। भगवद्भजनादेव तत्त्वज्ञानमित्येतत्प्रपंचयिष्यन्ब्र

आत्मतत्त्वविशुद्ध्यर्थं यदाह भगवानृतं। ब्रह्मणे दर्शयन्रूपमव्यलीकव्रतादृतः॥ ४॥ स आदिदेवो
जगतां परो गुरुः स्वधिष्ण्यमास्थाय सिसृक्षयैक्षत। तां नाध्यगच्छद्दृशमत्र संमतां प्रपंचनिर्माण
विधिर्यया भवेत्॥ ५॥ स चिंतयन्द्व्यक्षरमेकदांभस्युपाशृणोद्द्विर्गदितं वचो विभुः। स्पर्शेषु यत्षोडश
मेकविंशं निःकिंचनानां नृप यद्धनं विदुः॥ ६॥

ह्मणोपि तत्त्वज्ञानं तत्प्रसादादेवेति दर्शयितुमितिहासमा
ह। स इत्यादिना। परो गुरुः भक्तिरहस्योपदेष्टा। स्वधिष्ण्यं पद्मं। आस्थाय अधिष्ठाय। तस्य अधिष्ठानान्वेषणा
य पूर्वं जले निमग्नः [illegible] ॥ पुनरावृत्तस्य स्वधिष्ण्ये स्थित्वेत्यर्थः।
तत्र तत् कथं स्रक्ष्यामीत्यालोचितवान्। तां दृशं प्रज्ञां। अत्र सृष्टिविषये संमतां अव्यभिचारिणीं। विधिः प्रकारः।
५। स द्विः चिंतयन् कदाचिद्द्व्यक्षरं वचः। अंभसि उपाशृणोत्। उपप समीपे श्रुतवान्। ते अक्षरे दर्शयति। कादयो मावसा
नाः स्पर्शाः। तेषु यत्षोडशं तकारः। यच्चैकविंशः पकारः। वचसो निर्देशार्थं तदर्थमाह। हे नृप निःकिंचनानां यद्धनं
नो धनं यद्विदुः। यन्न तपो धनाः इति प्रसिद्धाः। तद्द्विः गदितं तप तपेति लोमेध्यमपुरुषैकवचनं। तस्य पवीप्सा सादर राम· ४४

पांडूनामर्षभः श्रेष्ठः आनुपूर्व्येणेति निरुक्तावक्रमोत्रविवक्षितः नपश्चक्रमः ॥२९॥ इतिद्वितीयेष्टमः ॥ राजप्रश्नोत्तरं वक्ष्य
न्नवेहस्मिणेहरिणोदितं ॥ कथयामासनवमेशुकोभागवतः पुनः ॥ तत्रयत्तावदुक्तं ॥ यदधातुमतइत्यनेनजीवस्यक
थंदेहसंबंधइति ॥ तत्रोत्तरमाह ॥ आत्मनोहरेर्मायामंतरेण ॥ अनुभवरूपस्यात्मनः अर्थेनदृश्येनदेहादिनासंबंधः
अंजसातत्वतोनघटेत ॥ अत्रहेतुः परस्यस्वप्नदृष्टुर्यथास्वप्नदेहसंबंधोनघटे ततद्वत् ॥१॥ संसारोपिमाय

यद्यत्परीक्षिदृषभः पांडूनामनुपृच्छति ॥ आनुपूर्व्येणतत्सर्वमाख्यातुमुपचक्रमे ॥२९॥ इतिश्रीभा
गवतेमहापुराणे द्वितीयस्कंधेप्रश्नविधिर्नामाऽष्टमोध्यायः ॥ शुकउवाच ॥ आत्ममायामृते
राजन्परस्यानुभवात्मनः ॥ नघटेतार्थसंबंधः स्वप्नद्रष्टुरिवांजसा ॥१॥ बहुरूपइवाभातिमाय
याबहुरूपया ॥ रममाणोगुणेष्वस्याममाहमितिमन्यते ॥२॥ यर्हिवावमहिम्निस्वेपरस्मिन्काल
माययोः ॥ रमेतगतसंमोहस्त्यक्त्वोदास्तेतदोभयं ॥३॥

यैवेत्याह ॥ बहुरूपः बाल्यवादिरूपः ॥ देवनरा
दिरूपश्च आभाति ॥ गुणेषुदेहादिषु ॥२॥ अतएवभक्तियोगेनतन्निरासेसतिमोक्षोपिघटतइत्याह यर्हीति ॥
वावशब्दएवार्थेस्वएवमहिम्नियदारमेततदेवाह कालमाययोः पुरुषप्रकृत्योः परस्मिन् ॥ तदाउभयंअहंम
मेतिचत्यक्त्वाउदास्तेपूर्णस्वरूपेणावतिष्ठते ॥ तदुक्तं ययासंमोहितोजीवआत्मानंत्रिगुणात्मकं ॥ परोपिम
नुतेनर्थंतत्कृतंचाभिपद्यते ॥ अनर्थोपशमंसाक्षात्भक्तियोगमधोक्षजे ॥ लोकस्याजानतोविद्वांश्चक्रेसात्वतसंहितामिति
॥३॥

श्यामास्तेऽवदाताश्चपद्मनेत्राःपीतांबराःसुरुचः॥अतिकमनीयाःसुपेशसः॥अतिसुकुमाराःउन्मिषंतइवप्र
भावंतोमणिप्रवेकामणिपुत्तमायेषुतानिनिष्काणिपदकान्याभरणानियेषांते॥सुवर्चसःअतितेजस्विनः॥११॥
प्रवालादिवत्वर्चांवर्णोयेषांते॥परिस्फुरंतिकुंडलानिमौलयोमालाश्चसंतियेषां॥११॥पार्षदान्अनुवर्ण्य
पुनरपिलोकमनुवर्णयतिभ्राजिष्णुभिर्दिदीप्यमानाभिः॥प्रमदोत्तमानांदिवःकान्तयस्ताभिःविद्योतमानः

45

श्यामावदाताःशतपत्रलोचनाःपिशंगवस्त्राःसुरुचःसुपेशसः॥सर्वेचतुर्बाहवउन्मिषन्मणिप्र
वेकनिष्काभरणाःसुवर्चसः॥११॥प्रवालवैडूर्यमृणालवर्चसःपरिस्फुरत्कुंडलमौलिमालिनः॥भ्रा
जिष्णुभिर्यःपरितोविराजतेलसद्विमानावलिभिर्महात्मनां॥विद्योतमानःप्रमदोत्तमाद्युभिःस
विद्युदभ्रावलिभिर्यथानभः॥१२॥श्रीर्यत्ररूपिण्युरुगायपादयोःकरोतिमानंबहुधाविभूति
भिः॥प्रेंखंश्रितायाकुसुमाकरानुगैर्विगीयमानाप्रियकर्मगायती॥१३॥ददर्शतत्राखिलसात्वतां
पतिंश्रियःपतिंयज्ञपतिंजगत्पतिं॥सुनंदनंदप्रबलार्हणादिभिःस्वपार्षदमुख्यैःपरिसेवितंविभुं॥१४॥

सहविद्युद्भिःवर्तमानाःसविद्युतःताभिरभ्रावलीभिः॥तत्रविद्युतइवस्त्रियः॥अभ्रपंक्तयइव विमाना
निनभइवलोकः॥१२॥श्रीःसंपद्रूपिणीमूर्तिमती॥मानंपूजांविभूतिभिर्नानाविभवैः प्रेंखंआंदोलंसंश्रि
ताकुसुमाकरोवसंतस्तस्यानुगाःभ्रमरास्तैर्विविधंगीयमाना॥स्वयंतुप्रियस्यहरेःकर्मगायतीभवतीति॥१३॥

यएवंभूतोलोकः तत्र तस्मिन् ॥१४॥

एवं निशम्य तस्य वचसो वक्तुर्दिदृक्षया ॥ ततः प्रचलितः सन् दिशो विलोक्य पुनः स्वधिष्ण्यमास्थाय केन चित्प्रत्यक्षं नि
युक्त इव तच्चात्मनो हितं विमृश्य तपसि मनो धृतवानित्यर्थः ॥७॥ ततश्च सः अखिलानां लोकानां तापनं प्रकाशकं
तपः अतप्यत कृतवान् ॥ तपतपेत्येतस्य वचसोऽर्थे अमोघं दर्शनं यस्य ॥ जितः अनिलः आत्मा मनश्च येन वि
जितानि उभयेंद्रियाणि ज्ञानकर्मात्मकानि येन तपतां तपश्चरतां मध्ये तपीयान् अतिशयेन तपस्वी ॥८॥ त

निशम्य तद्वक्तृदिदृक्षया दिशो विलोक्य तत्रान्यदपश्यमानः ॥ स्वधिष्ण्यमास्थाय विमृश्य तद्धितं
तपस्युपादिष्ट इवादधे मनः ॥७॥ दिव्यं सहस्राब्दममोघदर्शनो जितानिलात्मा विजितोभयेंद्रियः
अतप्यत स्माखिललोकतापनं तपस्तपीयांस्तपतां समाहितः ॥८॥ तस्मै स्वलोकं भगवान् सभाजितः
संदर्शयामास परं न यत्परं ॥ व्यपेतसंक्लेशविमोहसाध्वसं स्वदृष्टवद्भिर्विबुधैरभिष्टुतं ॥९॥ प्रवर्त्त
ते यत्र रजस्तमस्तयोः सत्त्वं च मिश्रं न च कालविक्रमः ॥ न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरा
सुरार्चिताः ॥१०॥

स्वै ब्रह्मणे स्वलोकं वैकुंठाख्यं पदं श्रेष्ठं न यत्परं यतः परमुत्कृष्टमन्यन्नास्ति ॥
तमेव लोकमनुवर्णयति पंचभिः ॥ व्यपेताः संक्लेशादयो यस्मात् स्वदृष्टवद्भिः सत्पुण्यवद्भिः यद्वा
स्वस्य दृष्टं दर्शनमस्ति येषां ॥ आत्मविद्भिरित्यर्थः ॥९॥ ताभ्यां मिश्रं सत्त्वं च न प्रवर्त्तते ॥ किंतु शुद्धमे
व सत्त्वं ॥ कालविक्रमो नाशः ॥ अपरे रागलोभादयो न संतीति किमुत वक्तव्यं ॥ अनुव्रताः पार्षदाः ॥१०॥

भा॰ द्वि॰ ४६

सिसृक्षयाहेतुनाचिरंसंभृतेनतपसाहंसम्यक्तोषितः दुस्तोषः तोषयितुमशक्यः ॥१९॥ माइतिमां ॥ श्रेयसांफला
नांपरिश्रामः ॥ परिश्रमः साधनप्रयासः ममदर्शनमवधिर्यस्यसतथा अतोधिकंतुपुनः फलंनास्तीत्यर्थः ॥२०॥ एत
च्चमत्कृपयैवत्वयाप्राप्तमित्याह मनीषितमिच्छातुभ्यमिदंदातव्यमितियाममेच्छातस्यानुभावोयं ॥ कोसौतं
माह ममलोकस्यावलोकनंपतत् ॥ नचेदंममैवतपोबलेनप्राप्तमितिस्यात्तंत्र्यंमन्यस्वतत्प्रवृत्तेरपिमत्कृतत्वा

46

श्रीभगवानुवाच ॥ त्वयाहंतोषितःसम्यक्वेदगर्भसिसृक्षया ॥ चिरंभृतेनतपसादुस्तोषःकूटयोगि
नां ॥१९॥ वरंवरयभद्रंतेवरेशंमाभिवांछितं ॥ ब्रह्मन्श्रेयःपरिश्रामःपुंसांमद्दर्शनावधिः ॥२०॥ मनीषि
तानुभावोयंममलोकावलोकनं ॥ यदुपश्रुत्यरहसिचकर्थपरमंतपः ॥२१॥ प्रत्यादिष्टंमयातत्रत्व
यिकर्मविमोहिते ॥ तपोमेहृदयंसाक्षादात्माहंतपसोनघ ॥२२॥ सृजामितपसैवेदंग्रसामितप
सापुनः ॥ बिभर्मितपसाविश्वंवीर्यंमेदुश्चरंतपः ॥२३॥ ब्रह्मोवाच ॥ भगवन्सर्वभूतानामध्यक्षोवस्थि
तोगुहां ॥ वेदह्यप्रतिरुद्धेनप्रज्ञानेनचिकीर्षितं ॥२४॥

दित्याह रहसितपतपेतियद्वचउपश्रुत्यपरमंत
पश्चकर्थकृतवानसि ॥२१॥ तदपित्वांप्रतिमयैवादिष्टंउपदिष्टं ॥ कदा ॥ तत्रतदासृष्ट्यारंभे ॥ त्वयिकर्मणिकार्ये
र्थेविमोहितेसति ॥ किंच ॥ तपोनाममममैवशक्तिरित्याह ॥ तपोमेहृदयंअंतरंगाशक्तिः ॥ आत्मास्वरूपंयस्य
ज्ञानमयंतपइतिःश्रुते ॥२२॥ ग्रसामिसंहरामि ॥ बिभर्मिपालयामि ॥ वीर्यंशक्तिः ॥२३॥ अध्यक्षः अधिष्ठाता ॥ गुहां

राम॰ ४६

भक्तानां प्रसादे अभिमुखं दृगेव अस्रा सवद्वद्रुसुणां हर्षकरी यस्य तं ॥ प्रसन्नहासमरुणलोचनं चाननं यस्य वक्षसि स्थितया च श्रिया लक्षितं ॥ अलंकृतमित्यर्थः ॥१५॥ अध्यर्हणीयं वरिष्ठं सिंहासनं ॥ चतस्रः प्रकृतिपुरुषमहदहंकाररूपाः षोडश एकादशेंद्रियमहाभूताख्याः पंच तन्मात्ररूपा याः शक्तयस्ताभिर्वृतं ॥ स्वैर्भगैः स्वाभाविकैः ऐश्वर्यादिभिः ॥ इतरत्र योगिषु अध्रुवैः आगंतुकैः साधारणैरित्यर्थः ॥ एवं सत्यपि स्व एव धामन् स्वस्वरूप एव

भक्तप्रसादाभिमुखं दृगासवं प्रसन्नहासारुणलोचनाननं ॥ किरीटिनं कुंडलिनं चतुर्भुजं पीतांबरं वक्षसि लक्षितं श्रिया ॥१५॥ अध्यर्हणीयासनमास्थितं परं वृतं चतुःषोडशपंचशक्तिभिः ॥ युक्तं भगैः स्वैरितरत्र चाध्रुवैः स्व एव धामन्नममाणमीश्वरं ॥१६॥ तद्दर्शनाह्लादपरिप्लुतांतरो हृष्यत्तनुः प्रेमभराश्रुलोचनः ॥ ननाम पादांबुजमस्य विश्वसृक् यत्पारमहंस्येन पथाधिगम्यते ॥१७॥ तं प्रीयमाणं समुपस्थितं तदा प्रजाविसर्गे निजशासनार्हणं ॥ बभाष ईषत्स्मितशोचिषा गिरा प्रियः प्रियं प्रीतमनाः करे स्पृशन् ॥१८॥

रममाणं अत एव ईश्वरं ॥१६॥ तस्य दर्शनेन यः आह्लादः तेन परिप्लुतं व्याप्तं अंतरमंतःकरणं यस्य ॥ हृष्यंती रोमांचिता तनुर्यस्य प्रेमभरेण अश्रुणि लोचनेषु यस्य विश्वसृक् ब्रह्मा पारमहंस्येन पथा ज्ञानमार्गेण ॥१७॥ तं ब्रह्माणं भगवान् बभाषे प्रजाविसर्गकार्ये निजशासनार्हणं स्वनियोगार्हं प्रजाविसर्गे समुपस्थितमिति चाध्रुपः ईषत्स्मितेन रोचिर्दीप्तिः शोभा यस्याः तया गिरा ॥१८॥ ॥

अवश्यंचमदोभविता॥सत्तुकिंचित्कालंमाभूदितिप्रार्थयते॥यावदिति॥भोईश॥तेत्वयालौकिकस्यसखुःसखे
वाहंस्ततःकरस्पर्शनादिनाममत्वेनसंमानितःसन्प्रजासर्गरूपेतवपरिकर्मणिसेवायांस्थितोऽविक्लवोऽव्याकु
लएवयावज्जनविभजामितन्ममध्यमादिभेदेनसृजामितावत्तत्त्वत्संमानादहमप्यजःस्वतंत्रइतिमानिनो
मेसमुन्नद्धउत्कटोमदोमाभूत्॥यद्वा॥मदोमांसमुन्नद्धमासमुन्नत्युतांउद्धितोनभवेदित्यर्थः॥२९॥ज्ञानशास्त्रो
क्तं विज्ञानमनुभवः॥रहस्यंभक्तिः॥सुगोप्यमपिवक्ष्यामीत्यादिनिर्देशात्॥तस्यांगंसाधनं॥३०॥यावान्स्वरूप

यावत्सखासख्युरिवेशतेकृतःप्रजाविसर्गेविभजामिभोजनं॥अविक्लवस्तेपरिकर्मणिस्थि
तोमामेसमुन्नद्धमदोजमानिनः॥२९॥श्रीभगवानुवाच॥ज्ञानंपरमगुह्यंमेयद्विज्ञानसमन्वितं॥
सरहस्यंतदंगंचगृहाणगदितंमया॥३०॥यावानहंयथाभावोयद्रूपगुणकर्मकः॥तथैवतत्त्वविज्ञ
ानमस्तुतेमदनुग्रहात्॥३१॥अहमेवासमेवाग्रेनान्यद्यत्सदसत्परं॥पश्चादहंयदेतच्चयोऽवशि
ष्येतसोऽस्म्यहं॥३२॥

तःपरिमाणतः॥यथाभावःसत्तावान्॥यानिरूपाणिगुणाःकर्माणिचयस्य॥३१॥एतदेव
सम्यग्गुह्यदिशनन्यावानित्यस्यार्थंस्फुटयति॥अहमेवाग्रेसृष्टेःपूर्वमासंस्थितः॥नान्यत्किंचित्॥यत्सत्स्थू
लं॥असत्सूक्ष्मं॥परंतयोःकारणंप्रधानं॥तस्याप्यंतर्मुखतयामय्येवलीनत्वात्॥अहंचतदाप्यासमेवके
वलंनचान्यदकरवं॥पश्चात्सृष्टेरनंतरमप्यहमेवास्मियदेतद्विश्वंतदप्यहमस्मिप्रलयेयोऽवशिष्येत

[illegible]
परिपूर्णोऽहमस्मीति भवति॥३२॥

नाथमानस्य याचमानस्य उपतप्यमानस्येति वा । हे नाथ । नाथय । आशंसय प्रयच्छ । नाथितं याचितं नाथृनाथृया
च्ञोपतापैश्वर्याशीःषु नाथितमेवाह परं सूक्ष्मं अवरं स्थूलं च ते रूपं यथा जानीयां ॥ २५ ॥ यथा च त्वं क्रीडसि
तथा तद्विषयां मनीषां मयि धेहीत्युत्तरेणान्वयः । नानाशक्त्युपबृंहितं विश्वं विलुंपन् । विविधंसृजन् । बिभ्र
त्पालयन् । आत्मना स्वयमेव आत्मानं ब्रह्मादिरूपं गृह्णन् अनुगृह्णन् क्रीडसि ॥ २६ ॥ ऊर्णुते तंतुभिः

तथापि नाथमानस्य नाथ नाथय नाथितं । परावरे यथा रूपे जानीयां ते त्वरूपिणः ॥ २५ ॥ यथा
त्ममायायोगेन नानाशक्त्युपबृंहितं । विलुंपन् विसृजन् गृह्णन् बिभ्रदात्मानमात्मना ॥ २६ ॥
क्रीडस्यमोघसंकल्प ऊर्णनाभिर्यथोर्णुते । तथा तद्विषयां धेहि मनीषां मयि माधव ॥ २७ ॥
भगवच्छिक्षितमहं करवाणि ह्यतंद्रितः । नेहमानः प्रजासर्गं बध्येयं यदनुग्रहात् ॥ २८ ॥

आत्मानमाच्छादयति ॥ २७ ॥ ननु किं सृष्टेरुद्विग्न एव तत्त्वज्ञानं प्रार्थयसे नेत्याह । भगवता त्वया शिक्षितं
अनुशिष्टं ॥ अतंद्रितः अनलसः सन् करिष्यामि । तर्हि किमनेन तत्त्वज्ञानेन तत्राह । यस्मादेवंभूतात्त
वानुग्रहात्प्रजासर्गमीहमानः कुर्वन्नपि अहंकारादिभिर्बद्धो न भवेयमिति ॥ २८ ॥ ॥

भा॰ द्वि॰ यत्स्वार्थितं तेनेह मानप्रजासर्गमिति तत्प्रसादीकरोति ॥ एतन्मतं समातिष्ठ ॥ समाधिना चित्तैकाग्र्येण ॥ क
४८ ल्पेषु विकल्पाः विविधाः सृष्टयस्तेषु विमोहं कर्तृत्वाभिनिवेशं न यास्यतीति ॥ ३७ ॥ एवं संप्रदिश्य ॥ जनानां
परमेष्ठिनं परमेष्ठ्याधिपत्ये स्थितं ब्रह्माणं ॥ आत्मनस्तद्रूपं न्यरुणत् अंतर्हितवान् ॥ ३८ ॥ अंतर्हिताः इंद्रि
यार्थाः प्रतप्तं रूपं येन तस्मै बद्धांजलिः सन् ॥ ३९ ॥ तदनंतरं पूर्वोक्तो ब्रह्मनारदसंवादः प्रवृत्त इत्याह

48

एतन्मतं समातिष्ठ परमेण समाधिना ॥ भवान्कल्पविकल्पेषु न विमुह्यति कर्हिचित् ॥ ३७ ॥
श्रीशुक उवाच ॥ संप्रदिश्यैवमजनो जनानां परमेष्ठिनं ॥ पश्यतस्तस्य तद्रूपमात्मनो न्यरुणद्
हरिः ॥ ३८ ॥ अंतर्हितेंद्रियार्थाय हरये विहितांजलिः ॥ सर्वभूतमयो विश्वं ससर्जेदं स।
पूर्ववत् ॥ ३९ ॥ प्रजापतिर्धर्मपतिरेकदा नियमान्यमान् ॥ भद्रं प्रजानामन्विच्छन्नाति
ष्ठत्स्वार्थकाम्यया ॥ ४० ॥ तं नारदः प्रियतमो रि[illegible]दानामनुव्रतः ॥ शुश्रूषमाणः शीलेन। कथा २
प्रश्रयेण दमेन च ॥ ४१ ॥ मायां विविदिषन्विष्णोर्मायेशस्य महामुनिः ॥ महाभागवतो
राजन्पितरं पर्यतोषयत् ॥ ४१ ॥

प्रजापतिरिति पंचभिः ॥ प्रजानां भद्रमन्विच्छन् विमृशन् ॥ सैव स्वार्थकाम्या स्वप्रयोजनेच्छा तयायम
नियमानातिष्ठत् ॥ ४० ॥ रिक्थादानां पुत्राणां मध्ये प्रियतमः तं पितरं सेवमानः शीलादिना परितोषया राम॰
मास ॥ ४१ ॥ किमिच्छन् विष्णोर्मायां विविदिषन् ॥ ४२ ॥ ४८

विज्ञानमुपदिशति॥ ऋतेर्थमिति॥ अबाध्यमर्थमृते यत्प्रतीयेत परं देहघटादिकं जाग्रत्स्वप्नयोरात्मनि सु
षुप्तावस्थायां न प्रतीयेत च तदात्मनो मायां विद्यात्॥ आभासश्चंद्रादेः प्रतिबिंबरूपः तमः छाया तदु
भयं यदा प्रतीयते तदा अर्थं विना प्रतीयते न च इंदुपुरुषयोः स्वरूपं इति अद्वितीय आत्मा तद्व्यतिरिक्त
मार्थमपमिति साङ्कृत्कारो विज्ञानमित्यर्थः इति चित्सुखाचार्याः॥ यथात्ममायायोगेनेत्यनेन मायायाः
पिपरत्वादल्पमाणां प्रयोगित्वाच्च मायां निरूपयति॥ ऋतेर्थं विनापि वास्तवमर्थं यद्यतः किमप्यनिरुक्तं
आत्मन्यधिष्ठाने प्रतीयेत॥ सदपि च न प्रतीयेत तत् आत्मनो मम मायां विद्यात् यथा आभासो द्विचंद्रादिः

ऋतेर्थं यत्प्रतीयेत न प्रतीयेत चात्मनि॥ तद्विद्यादात्मनो मायां यथाभासो यथा तमः॥३४॥ यथा महां
ति भूतानि भूतेषूच्चावचेष्वनु॥ प्रविष्टान्यप्रविष्टानि तथा तेषु न तेष्वहं॥३५॥ एतावदेव जिज्ञास्यं त
त्त्वजिज्ञासुनात्मनः॥ अन्वयव्यतिरेकाभ्यां यत्स्यात्सर्वत्र सर्वदा॥३६॥

ति अर्थं विना प्रतीतौ दृष्टांतः य
थातम इति राहुर्यथा ग्रहमंडलगतोपि न दृश्यते सतोऽप्रतीतौ॥३४॥ यथाभाव इत्येतत्स्पष्टयति॥ यथा महा
भूतानि भौतिकेषु अनु सृष्टेरनंतरं प्रविष्टानि तेषूपलभ्यमानत्वात्॥ अप्रविष्टानि च प्रागेव कारणात्वेन ते
के३ षु विद्यमानत्वात्॥ तथा तेषु भूतभौतिकेषु अहं न च तेषु अहं॥ एवं भूता मम सत्तेत्यर्थः॥३५॥ साधनमाह॥ आत्मन
स्तत्त्वजिज्ञासुना एतावत्त्वमेव जिज्ञास्यं विचार्यं तदेवाह॥ अन्वयः कार्येषु कारणत्वेनानुवृत्तिः कारणावस्था
यां च तेभ्यो व्यतिरेकः तथा जाग्रदाद्यवस्थासु तत्साक्षितया अन्वयः व्यतिरेकश्च समाध्यादौ॥ एवमन्वयव

न चैवमर्थभेदाच्छास्त्रभेदः स्यादित्याह ॥ दशमस्याश्रयस्य विशुद्ध्यर्थं तत्त्वज्ञानार्थं नवानां लक्षणं स्वरूपं एकस्यैव
प्राधान्यान्नायं दोष इत्यर्थः ॥ न च तत्र नैवं प्रतीयते ॥ अत आह ॥ श्रुतेन श्रुत्यैव स्तुत्यादिस्थानेषु अंजसा
साक्षाद्वर्णयंति ॥ अर्थेन तात्पर्यवृत्त्या च तत्तदाख्यानेषु ॥ २ ॥ सर्गादीनां प्रत्येकं लक्षणमाह ॥ भूतानि आ-
काशादीनि ॥ मात्राणि च शब्दादीनि ॥ इंद्रियाणि च धीशब्देन महदहंकारौ गुणानां वैषम्यात् परिणामात्
ब्रह्मणः परमेश्वरात् कर्त्तुर्भूतादीनां पद्धिराद्रूपेण स्वरूपतश्च जन्म स सर्गः ॥ पुरुषो वैराजः तत्कृतः पौरु-

49

दशमस्य विशुद्ध्यर्थं नवानामिह लक्षणं ॥ वर्णयंति महात्मानः श्रुतेनार्थेन चांजसा ॥ २ ॥ भूतमा
त्रेंद्रियधियां जन्म सर्ग उदाहृतः ॥ ब्रह्मणो गुणवैषम्यात् विसर्गः पौरुषः स्मृतः ॥ ३ ॥ स्थिति
वैकुंठविजयः पोषणं तदनुग्रहः ॥ मन्वंतराणि सद्धर्म ऊतयः कर्म्मवासनाः ॥ ४ ॥ अवतारानु
चरितं हरेरस्यानुवर्त्तिनां ॥ पुंसामीशकथाः प्रोक्ता नानाख्यानोपबृंहिताः ॥ ५ ॥ ॥ ॥

षः चराचरसर्गो विसर्ग इत्यर्थः ॥ ३ ॥ वैकुंठस्य भगवतो विजयः सृष्टानां तत्तन्मर्यादापालनेनोत्कर्षः स्थितिः स्थानं
स्वभक्तेषु तस्यानुग्रहः पोषणं ॥ तदनुगृहीतानां सतां मन्वंतराधिपतीनां धर्म्मः ॥ कर्म्मणां वासना वेजंतंतु
संतानेऽऊपते कर्मभिः संतन्यंत इत्यूतयः ॥ यद्वा वद्धअर्थात् संश्लेषार्थाद्धावयतेर्द्धातोरिदं रूपं ॥ ऊयंते कर्म
भिर्वर्द्धंते संश्लिष्यंत इति वा ऊतय इत्यर्थः ॥ ४ ॥ हरेरवतारानुचरितं अस्यानुवर्त्तिनां च सत्कथा ईशानु

निशाम्यदृष्ट्वाज्ञात्वेत्यर्थः॥मामं॥४३॥भगवताचतुःश्लोक्या संक्षेपेण प्रोक्तं विस्तरेण प्राहदशलक्षणानिलक्षणी
या अर्था विद्यंतेयस्मिनतत्॥४४॥तत्संप्रदायतोभागवतंमयाज्ञातमित्याशयेनाह॥नारदइति॥४५॥भागवत
व्याख्यानेनैवत्वत्प्रश्नानामुत्तरंदास्यामीत्याह॥यदुतेति॥पुरुषावयवैर्लोकाःसपालाःपूर्वंकल्पिताइत्यादि

तुष्टंनिशाम्यपितरंलोकानांप्रपितामहं॥देवर्षिःपरिपप्रच्छभवान्यन्मानुपृच्छति॥४३॥त
स्मा इदंभागवतंपुराणंदशलक्षणं॥प्रोक्तंभगवताप्राहप्रीतःपुत्रायभूतकृत्॥४४॥नारदःप्रा
हमुनयेसरस्वत्यास्तटेनृप॥ध्यायतेब्रह्मपरमंव्यासायामिततेजसे॥४५॥यदुताहंत्वयापृ
ष्टोवैराजात्पुरुषादिदं॥यथासीत्तदुपाख्यास्येप्रश्नानन्यांश्चकृत्स्नशः॥४६॥इतिभागवते
महापुराणेद्वितीयस्कंधेनवमोध्यायः॥९॥श्रीशुकउवाच॥अत्रसर्गोविसर्गश्चस्थानंपोष
णमूतयः॥मन्वंतरेशानुकथानिरोधोमुक्तिराश्रयः॥१॥ ॥ ॥ ॥

नावैराजात्पुरुषादिदंविश्वंकथमासीदितियदहंत्वयापृष्टः तद्यथावदुपाख्यास्यामिप्रश्नांश्चेति॥४६॥
इतिद्वितीयेनवमः॥ततोभागवतव्याख्याद्वारैवदशमेस्फुटं॥राजप्रश्नोत्तरंवक्तुमारेभेबादरायणिः
दशलक्षणंपुराणंप्राहेत्युक्तं॥तानिदशलक्षणानिदर्शयति अत्रेतिमन्वंतराणिईशानुकथाश्चेतिद्वं
द्वः॥सर्गादयोत्रदशार्थालक्ष्यंते॥१॥

उक्तमेवाध्यात्मादिविभागं प्रपंचयन् ॥ यदुताह त्वया पृष्टो वैराजात्पुरुषादिदं ॥ यथासीत्तदुपाख्यास्यौंति प्रतिज्ञा
तं तदुत्पत्तिप्रकारमाह ॥ पुरुष इत्यादिना ॥ पुरुषो वैराजः अंडं विनिर्भिद्य पृथक्कृत्य विनिर्गतः पृथक्
स्थित इत्यर्थः ॥ अयनं स्थानं आन्विच्छन् विमृशन् अयतः शुचीः शुद्धाः अपः गर्भोदकसंज्ञाः अस्राक्षीत्
ससर्ज ॥ १० ॥ अप्सु वासं नारायणनामनिरुक्त्या स्पष्टयति ॥ तेन अप्सु वासेन ॥ यद्यस्मात्पुरुषो नरः

पुरुषोंडं विनिर्भिद्य यदासौ स विनिर्गतः ॥ आत्मनोऽयनमन्विच्छन्नपोस्राक्षीच्छुचिः शुचीः ॥
॥ १० ॥ तास्ववात्सीत्स्वसृष्टासु सहस्रपरिवत्सरान् ॥ तेन नारायणो नाम यदापः पुरुषोद्भवाः ॥ ११ ॥
द्रव्यं कर्म च कालश्च स्वभावो जीव एव च ॥ यदनुग्रहतः संति न संति यदुपेक्षया ॥ १२ ॥ एको
नानात्वमन्विच्छन्योगतल्पात्समुत्थितः ॥ वीर्यं हिरण्मयं देवो मायया व्यसृजत्त्रिधा ॥ १३ ॥ अ
धिदैवमथाध्यात्ममधिभूतमिति प्रभुः ॥ अथैकं पौरुषं वीर्यं त्रिधाभिद्यत तच्छृणु ॥ १४ ॥

तस्मादुद्भवोपासंतताः नाराः आपो पनमस्येति नारायण इत्यर्थः ॥ तदुक्तं ॥ आपो नारा इति प्रोक्ता आपो वै
नरसूनवः ॥ अयनं तस्य ताः पूर्वं तेन नारायणः स्मृत इति ॥ ११ ॥ तस्य प्रभावमाह द्रव्यं उपादानं ॥ कर्मादी
नि निमित्तानि ॥ जीवो भोक्ता यस्यानुग्रहात् संति कार्यक्षमा भवंतीत्यर्थः ॥ १२ ॥ योग एव तल्पः शय्या त
स्मात् वीर्यं गर्भरूपं देहं हिरण्मयमिव प्रकाशबहुलं ॥ १३ ॥ तस्यैव च प्रपंचः ॥ अथेत्यादिना ॥ १४ ॥

अस्यात्मनो जीवस्य हरेर्योगनिद्रामनुप्रवृत्तशक्तिभिरुपाधिभिः सह शयनं लयः निरोधः ॥ अन्यथारूपं अविद्ययाध्यस्तं कर्तृत्वादि हित्वा स्वरूपेण ब्रह्मतया व्यवस्थितिर्मुक्तिः ॥ ६ ॥ आभासः सृष्टिः ॥ निरोधो लयश्च यतो भवति अध्यवसीयते प्रकाशते च स ब्रह्मेति परमात्मेति प्रसिद्धः आश्रयः कथ्यते ॥ ७ ॥ आश्रयस्वरूपमपरोक्षानुभवेन स्पष्टं दर्शयितुमध्यात्मादि विभागमाह ॥ योऽयमध्यात्मिकः पुरुषः चक्षुरादिकरणाभिमानी द्रष्टा जीवः स एवाधिदैविकः चक्षुराद्यधिष्ठाता सूर्यादिः तत्रैकस्मिन्नेव उभयोर्द्विरूपो विच्छेदो यस्मात्स आधिभौतिकः ॥ चक्षुर्गोलकाद्युपलक्षितो दृश्यो देहः पुरुष इति पुरुष

निरोधोऽस्यानुशयनमात्मनः सह शक्तिभिः ॥ मुक्तिर्हित्वान्यथारूपं स्वरूपेण व्यवस्थितिः ॥ ६ ॥ आभासश्च निरोधश्च यतश्चाध्यवसीयते ॥ स आश्रयः परं ब्रह्म परमात्मेति कथ्यते ॥ ७ ॥ योऽध्यात्मिकोऽयं पुरुषः सोऽसावेवाधिदै-
५५२ विकः ॥ यस्तत्रोभयविच्छेदः स स्मृतो ह्याधिभौतिकः ॥ ८ ॥ एकमेकतराभावे यदा नोपलभामहे ॥ त्रितयं तत्र यो
वेद स आत्मा स्वाश्रयाश्रयः ॥ ९ ॥

स एव जीवस्योपाधिः ॥ स वा एष पुरुषोऽन्नरसमय इत्यादि श्रुतेः ॥ ८ ॥ एकमेकतराभाव इत्येतेषामन्योन्यसापेक्षसिद्धित्वेन नानात्मत्वं दर्शयति ॥ तथा हि ॥ दृश्यं विना तदनुमेयं करणं न सिध्यति नापि द्रष्टा न च तद्विना करणमेव तदनुमेयस्तदधिष्ठाता सूर्यादिः ॥ न च तं विना करणं प्रवर्तते ॥ न च तद्विना दृश्यमित्येवमेकतरस्याभावे एकेनोपलभामहे ॥ तत्र तदा तत्त्रितयं आलोचनात्मकेन प्रत्ययेन यो वेद साक्षितया पश्यति स परमात्मा आश्रयः तेषामपि परस्परमाश्रयत्वमस्तीति तद्व्यवच्छेदार्थं विशेषणं ॥ स्वाश्रयः अनन्याश्रयः स्वस्वासावन्येषामाश्रयश्चेति तथा च भगवान् वक्ष्यति ॥ दृग्रूपमार्कं वपुरत्र रन्ध्रे परस्परं सिध्यति यः स्वतः खे ॥ आत्मा य एषामपरो य आद्यः स्वयानुभूत्याखिलसिद्धसिद्धिरिति ॥ एतेन व्याप्तिभावा रित्वा[illegible]तेषां मायामयत्वमप्युक्तं ॥ अत एव च पुरुषावयवैर्लोकाः सपाला

पूर्वकल्पिताः लोकैरभ्युपावचवाः सपालैरित्यनेनोक्तो वि
भा॰ टी॰ स्कं॰ २ ॥

भा·द्वि· नभस्वतिघ्राणवायोदोधूयतिदोधूयमानेत्यंतंप्रचलतिसति॥तत्रचनासिकायांवायुर्देवतागंधंवहतीतितथाच
५१ नेनगंधोविषयोदर्शितःघ्राणःइंद्रियं॥जिघ्रत्तंतगंधंगृहीतुमिच्छतः॥२०॥निरालोकंप्रकाशशून्यंआसीदितिशे
षः॥निर्मंत्यिकमितिवदेकवद्भावः तदाआत्मानंदेहंचकारादन्यच्चवस्तुदिदृक्षतआदित्यानीस्यात्॥ज्योतिःआ द्वि
त्योदेवता॥चक्षुरिंद्रियं ततोगुणस्यरूपस्यग्रहः ग्रहणं॥अनेनरूपंविषयोदर्शितः॥२१॥ऋषिभिर्वेदैःबोध्यमा
नस्य॥तत्रआत्मनःप्रबोधनंगृहीतुमिच्छतः॥ततोगुणग्रहःशब्दग्रहणं॥२२॥मृदुत्वंचकाठिन्यंचलघुत्वंच

51 नासिकेनिरभिद्येतांदोधूयतिनभस्वति॥तत्रवायुर्गंधवहोघ्राणोनसिजिघ्रक्षतः॥२०॥यदात्मनि
निरालोकमात्मानंचदिदृक्षतः॥निर्भिन्नेत्यक्षिणीतस्यज्योतिश्चक्षुर्गुणग्रहः॥२१॥बोध्यमानस्यऋ
षिभिरात्मनस्तज्जिघृक्षतः॥कर्णौचनिरभिद्येतांदिशःश्रोत्रंगुणग्रहः॥२२॥वस्तुनोमृदुकाठिन्य
लघुगुर्वोष्णशीतता॥जिघृक्षतस्त्वङ्निर्भिन्नातस्यांरोममहीरुहाः॥तत्रचांतर्बहिर्वायुस्त्वचाल
ब्धगुणोवृतः॥२३॥

गुरुत्वंचआउष्णत्वंईषदुष्णत्वंचशीततांचेत्यर्थः॥यद्यप्युष्णत्वमपींद्रियवि
षयएवतथापितस्याजिघ्रक्षाभावात्कोष्ममित्युक्तं॥गुर्वोष्णेतिपाठे॥यणादेशःछांदसः॥वस्तुनएतान्धर्मा
न्जिघृक्षतस्त्वङ्निर्भिन्नात्वगिंद्रियाधिष्ठानंचर्मजातमित्यर्थः॥तस्यांरोमाणिइंद्रियं॥महीरुहाश्चदेवता
जाताः॥वस्तुनिहस्तेनातोलितेलघुत्वगुरुत्वयोर्ज्ञानात्तयोरपित्वगिंद्रियविषयत्वमितिपौराणिकाः॥तत्र राम·
त्वचि॥अंतर्बहिश्चवातोवृतःआवृत्यास्थितःकर्त्तरिनिष्ठा॥कथंभूतः॥त्वचालब्धोगुणःस्य॥ ॥ ५१

अंतःशरीरेयः आकाशः तस्मात्क्रियाशक्त्यातत्रविविष्टंचेष्टमानस्यसतः ॥ ओजः इंद्रियशक्तिः ॥ सहोमनःशक्तिः
बलंदेहशक्तिः ततः क्रियाशक्त्यात्मकात्सूत्रात् यत्प्राणः सूत्राख्यः महान्मुख्यः ॥ असुःप्राणः सर्वेषां
॥१५॥ महत्त्वंदर्शयति ॥ प्राणाइंद्रियाणियंप्राणंतंचेष्टांकुर्वंतं ॥ अनुपश्चात् प्राणंतिचेष्टांकुर्वंति ॥ अपा
नंतंचेष्टातपजंतमनु अपानंतिचेष्टांतपजंति राजानमनुभृत्याइव ॥१६॥ क्षिपताचालयतानिमित्तेन

अंतःशरीर आकाशात्पुरुषस्यविचेष्टतः ॥ ओजः सहोबलंजज्ञेततः प्राणोमहानसुः ॥१५॥ अनुप्रा
णंतियंप्राणाः प्राणंतंसर्वजंतुषु ॥ अपानंतमपानंतिनरदेवमिवानुगाः ॥१६॥ प्राणेनाक्षिपता
क्षुत्तृडंतराजायतेविभोः ॥ पिपासतोजक्षतश्चप्राङ्मुखंनिरभिद्यत ॥१७॥ मुखतस्तालु ॥
निर्भिन्नंजिह्वातत्रोपजायते ॥ ततोनानारसोजज्ञेजिह्वयायोऽधिगम्यते ॥१८॥ विवक्षोर्मुख
तोभूम्नोवह्निर्वाग्व्याहृतंतयोः ॥ जलेवैतस्यसुचिरंनिरोधःसमजायत ॥१९॥ ॥

क्षुत्तृडादिकं ॥ विराड्जीवाभेदेनोपासनार्थमुक्तं ॥ अजायतेस्मततःजक्षतः भक्षयितुमिच्छतइत्यर्थः ॥ प्राक्
प्रथमंनिरभिद्यतविभक्तमभूत् ॥१७॥ तालुअधिष्ठानं ॥ जिह्वाइंद्रियंनानारसोविषयः वरुणश्चदेवता
जातवा ॥ एवंसर्वत्रअधिष्ठानमिंद्रियंदेवताविषयइत्येतच्चतुष्टयमनुक्तमपिद्रष्टव्यं ॥१८॥ विवक्षोःवक्तु
मिच्छोः मुखतएववह्निर्देवतावाक्इंद्रियंव्याहृतंभाषणं ॥ तयोरिति ॥ इंद्रियदेवताधीनत्वंकर्मणोदर्शयति ॥१९॥

प्रजा अपत्यं ॥ आनंदो रतिः ॥ अमृतं स्वर्गादि ॥ तदर्थिनः शिश्नः अधिष्ठानं ॥ उपस्थ इंद्रियं ॥ प्रजापतिश्चासीदिति ज्ञे
यं तदुभयाश्रयं कामानां स्त्री ॥ संभोगानां संबंधि प्रियं सुखं ॥ २६ ॥ धातुमलं भुक्तान्नादीनाम् सारांशं त्यक्तुमिच्छोः
गुदपायुमित्रोत्सर्गाः ॥ अधिष्ठानेंद्रियदेवताविषयाः ॥ २७ ॥ पुर्या देहात् पुरः देहांतराणि आसिसृप्सोः सर्वतो गं
तुच्छोः निरभिद्यतेत्यनुषंगः ॥ अपानतः अपगच्छतः पृथक्त्वं मरणं नाभ्यादीन्यधिष्ठानादीनि ॥ नाभ्यां हिंसा

निरभिद्यत शिश्नो वै प्रजानंदामृतार्थिनः ॥ उपस्थ आसीत्कामानां प्रियं तदुभयाश्रयं ॥ २६ ॥
उत्सिसृक्षोर्धातुमलं निरभिद्यत वै गुदं ॥ ततः पायुस्ततो मित्र उत्सर्ग उभयाश्रयः ॥ २७ ॥ आसि
सृप्सोः पुरः पुर्या नाभिद्वारमपानतः ॥ तत्रापानस्ततो मृत्युः पृथक्त्वमुभयाश्रयं ॥ २८ ॥ आदि
त्सोरन्नपानानामासन्कुक्ष्यंत्रनाडयः ॥ नद्यः समुद्राश्च तयोस्तुष्टिः पुष्टिस्तदाश्रये ॥ २९ ॥

णापानयोर्बंधविश्लेषे मृत्युरिति प्रसिद्धं ॥ २८ ॥ अन्नपानानामादित्सोः संग्रहेच्छोः कुक्षिश्चांत्राणि च नाड्य
श्चासन् तत्र कुक्षिरधिष्ठानं ॥ अंत्राणि अन्नसंग्रहे करणमिंद्रियस्थानीयं ॥ नाड्यस्तु पानसंग्रहे ॥ तयोर्नाडां
त्रवर्गयोः क्रमेण नद्यः समुद्राश्च देवते ॥ तुष्टिरुदरभरणं पुष्टिस्तु रसपरिणामतः स्थौल्यं ॥ तदाश्रये तदु
भयनिमित्ते ॥ तत्रान्नसंग्रहेच्छोः कुक्ष्यंत्रसमुद्रतुष्टय इति चतुष्टयं ॥ पेयसंग्रहेच्छोः कुक्षिनाडीनदीपुष्ट
य इति विवेकः ॥ २९ ॥

र्शायेन ॥ अयमर्थः ॥ त्वगिंद्रियमेव हि रूढं इति सहितं स्पर्शग्रहणं तल्लोमशब्देनोच्यते ॥ तत्र महीरुहाणां देव
त्वं अंतर्बहिश्च स्पर्शग्रहणं तत् देवत्वं केशशब्देनोच्यते तत्र जातो देवता तथा चान्तर्तीयेवस्पति ॥ त्वचमस्य
विनिर्भिन्नां विविशुर्धिष्ण्यमोषधीः ॥ अंशेन लोमभिः कंड्वैर्यैरसौ प्रतिपद्यते ॥ निर्भिन्नान्यस्य चर्माणि लो
कपालो निलो विशत् ॥ प्राणेनांशेन संस्पर्शं येनासौ प्रतिपद्यत इति ॥ तत्र चर्माणीति चर्मोपलक्षितात्त्वगि

हस्तौ रुरुहतुस्तस्य नानाकर्मचिकीर्षया ॥ तयोस्तु बलवानिंद्र आदानमुभयाश्रयं ॥ २४ ॥
गतिं जिगीषतः पादौ रुरुहातेभिकामिकां ॥ पद्भ्यां यज्ञः स्वयं हव्यं कर्मभिः क्रियते नृभिः ॥ २५ ॥

त्यर्थः ॥ प्राणेनांशेनेति ॥ प्राणवायुव्याप्तेन त्वगिंद्रियेणेत्यर्थः ॥ बहुवचनतो त्वेक एवांशो निर्दिष्टः त्वड्भिरभिघत
त्वचो लोमानि लोमभ्य औषधिवनस्पतय इति ॥ २३ ॥ रुरुहतुर्निर्भिन्नौ बलमिंद्रियं इंद्रो देवता ॥ तदुभयाश्रयं
आदानं कर्म ॥ २४ ॥ अभिकामिकां अभीप्सां विहितामित्यर्थः ॥ पद्भ्यां सह यज्ञो विष्णुरेव स्वयं तदधिष्ठातृरूपे
ण स्थितः कर्मभिरिति गत्याख्या कर्मशक्तिरिंद्रियमुक्तं ॥ हव्यं क्रियत इति गतिप्राप्यं यज्ञार्थद्रव्यं विषय
इत्युक्तं नृभिरिति च व्यष्टिजीवेष्वपि द्वयमेव रीतिरिति दर्शयन्नराधिकारित्वं यज्ञादीनां दर्शयति ॥ २५ ॥

स्थूलमुक्त्वासूक्ष्मंसमष्टिलिंगशरीरमाह॥अतःपरंअस्यकारणभूतंसूक्ष्मंअतींद्रियं॥यतःअव्यक्तंतत्कुतः
यतोनिर्विशेषणंतत्कुतःअनादिमध्यनिधनंउत्पत्तिस्थितिलयशून्यं॥नित्यंसदेकरूपंअपक्षयादिशून्य
मित्यर्थः अतएववाक्चमनश्चेतिद्वंद्वैकवंतस्मात्परं॥३४॥उपासनार्थंभगवत्यारोपितंरूपद्वयमपवदति
अमुनीइतिनगृह्णंतिवस्तुतोनांगीकुर्वंति॥यतोमायासृष्टे॥३५॥यदुक्तंगुणाकर्म्मक इतियदुक्तंभग

अतःपरंसूक्ष्मतममव्यक्तंनिर्विशेषणं॥अनादिमध्यनिधनंनित्यंवाङ्मनसःपरं॥३४॥
अमुनीभगवद्रूपेमयातेह्यनुवर्णिते॥उभेअपिनगृह्णंतिमायासृष्टेविपश्चितः॥३५॥
सवाच्यवाचकतयाभगवान्ब्रह्मरूपधृक्॥नामरूपक्रियाधत्तेसकर्माकर्मकःपरः॥३६॥
प्रजापतीन्मनून्देवान्ऋषीन्पितृगणान्पृथक्॥सिद्धचारणगंधर्वान्विद्याध्रासुरगु
ह्यकान्॥३७॥

वताब्रह्माणंप्रतितत्प्रपंचयितुंब्रह्मादिरूपाणितत्कर्माणिचाहसइत्यादिनाद्वयभावेनेत्यतःप्राक्त
नेनग्रंथेन॥सभगवान्ब्रह्मरूपधृक्सन्वाच्यवाचकतया॥वाचकतयानामानि॥वाच्यतयारूपा
णिक्रियाश्चधत्तेसृजतीत्यर्थः॥माययासकर्मासव्यापारःसनवस्तुतस्त्वकर्मकः॥३६॥एतत्प्रपंचय
ति॥प्रजापतीनितिसार्द्धैस्त्रिभिः॥द्वितीयांतानांधत्तइत्यनेनान्वयः॥तत्रप्रजायेत्यादीनिनामानितद्वा
च्यानिरूपाणितत्कर्माणिचज्ञेयानि॥पृथक्तत्तदवांतरभेदेन॥३७॥ ॥

निदिध्यासोर्नितरां चिंतयितुमिच्छोः कामोऽभिलाषः ॥ हृदयमनःचंद्रसंकल्पाः अधिष्ठानादयः ॥३०॥ तदेवमधिदैवा
दिभेदं विभज्योक्तात् दशभूतानां धात्वादीनां स्वरूपमाह ॥ त्वगिति द्वाभ्यां ॥ त्वक् स्थूलं ॥ चर्म तदुपरिस्थितं सूक्ष्मं
त्वगादयोऽस्थ्यंताः द्वंद्वैकवद्भावेन निर्दिष्टाः सप्त ये धातवः ते भूम्यप्तेजोमयाः तेषां च पांचभौतिकत्वेऽपि वाय्वा
काशयोराहारादिरूपेणासंवर्द्धकत्वाभावादेवमुक्तं ॥३१॥ गुणात्मकानि गुणेषु शब्दादिष्वात्मा येषां ॥ विष

निदिध्यासोरात्ममायां हृदयं निरभिद्यत ॥ ततो मनस्ततश्चंद्रः संकल्पः काम एव च ॥३०॥ त्व
क्चर्ममांसरुधिरमेदोमज्जास्थिधातवः ॥ भूम्यप्तेजोमयाः सप्त प्राणो व्योमांबुवायुभिः ॥३१॥
गुणात्मकानींद्रियाणि भूतादिप्रभवा गुणाः ॥ मनः सर्वविकारात्मा बुद्धिर्विज्ञानरूपिणी ॥३२॥
एतद्भगवतो रूपं स्थूलं ते व्याहृतं मया ॥ मह्यादिभिश्चावरणैरष्टभिर्बहिरावृतं ॥३३॥

प्राणो व्योमां
वायुभिर्नि
ऽसन्नइति
६

याभिमुखस्वभावानीत्यर्थः ॥ गुणाः शब्दादयः भूतादिरहंकारः ॥ ततः प्रकर्षेण भवंतीति तथा ॥ अहंका
रकल्पितशोभनस्वभावाः ॥ न वस्तुतस्तथेत्यर्थः ॥ अत्र हेतुः यतो मन एव सर्वविकाराणामात्मा स्वरू
पं बुद्धिस्तु तथाभूतार्थविज्ञानरूपिणी न तु परमार्थग्राहिणीति वैराग्यार्थमुक्तं ॥ अनेनैव बुद्धिमन
सोः स्वरूपं चोक्तं ॥३२॥ उपसंहरति एतदिति महत्त्वास हाष्टभिः ॥३३॥

मनोमात्रार्थविज्ञानरूपिणीर

भा॰ द्वि॰ ५४ रुद्ररूपेण संहर्तृत्वमाह। ततइति॥ आत्मनः सकाशाद्यदिदं सृष्टं तत्संनियच्छति संहरति॥४३॥ कर्तृत्वाद्यप्रवादेन
दशमस्य शुद्धिमाह। इत्थंभावेन सृष्ट्यादिरूपेण॥ तस्माद्वा एतस्मादात्मन आकाशः संभूतः सोकामयत बहु
स्यां प्रजायेयेत्यादिश्रुत्यैकथितः॥ सूरयस्तु परं केवलमेवंरूपेणैव द्रष्टुं नार्हंति॥४४॥ तत्किं यतः अस्य विश्व-
स्य जन्मादौ कर्मणि परस्येश्वरस्य इत्थंभावः कर्तृत्वं नास्ति॥ श्रुत्यापि तात्पर्येण न प्रतिपाद्यते॥ किंत्वनु

ततः कालाग्निरुद्रात्मा यत्सृष्टमिदमात्मनः॥ संनियच्छति कालेन घनानीकमिवाऽनिलः॥४३॥
इत्थंभावेन कथितो भगवान्भगवत्तमः॥ नेत्थंभावेन हि परं द्रष्टुमर्हंति सूरयः॥४४॥ नास्य क-
र्मणि जन्मादौ परस्यानुविधीयते॥ कर्तृत्वप्रतिषेधार्थं माययारोपितं हि तत्॥४५॥ अयं तु ब्र-
ह्मणः कल्पः सविकल्प उदाहृतः॥ विधिः साधारणो यत्र सर्गाः प्राकृतवैकृताः॥४६॥

विधीयते अनुवर्त्यते॥ किमर्थं। कर्तृत्वप्रतिषेधार्थं॥ हि यतो मायया तदारोपितं प्रकाशितं। तथा च श्रु-
तिः॥ निष्कलं निष्क्रियं शांतं निरवद्यं निरंजनं॥ इन्द्रो मायाभिः पुरुरूप ईयत इत्याद्या॥४५॥ उक्तमर्थमुप-
संहरति॥ अयं त्विति ब्रह्मणः संबंधी कल्पो महाकल्पः॥ विकल्पो वांतरः तत्सहितः उदाहृतः॥ उदाहर-
णं त्वन संक्षेपत उक्तः॥ कथंभूतः॥ यत्र महाकल्पे प्राकृताः महदादिसर्गाः॥ अवांतरकल्पे च वैकृताः
स्थावरादिसर्गा इत्ययं विधिः प्रकारः अन्यैर्महाकल्पादिभिः साधारणः॥४६॥ ॥ राम॰ ५४

54

गिरीन्नित्यस्यानंतरं नृपेति संबोधनं ॥३९॥ द्विविधाः स्थावरजंगमरूपेण ॥ चतुर्विधाः जरायुजांडजस्वेदजोद्भि
ज्जरूपेण ॥ जलस्थलनभांसि ओकांसि येषां तानि ॥ धत्त इति पूर्वेणान्वयः ॥ यद्वा राज्ञा पृष्टं यावत्यः कर्मगतयो
यादृशीर्द्विजसत्तमेति तस्यापि प्रसंगादनेनैवोत्तरमाह ॥ कुशला उत्तमाः ॥ अकुशलाः नीचाः मिश्रा इतिय

किंनराप्सरसो नागान्सर्पान्किंपुरुषोरगान् ॥ मातृरक्षः पिशाचांश्च प्रेतभूतविनायकान् ॥३८॥
कूष्मांडोन्मादवेतालान्यातुधानान्ग्रहानपि ॥ खगान्मृगान्पशून्वृक्षान्गिरीन्नृप सरीसृपान्
॥३९॥ द्विविधाश्चतुर्विधा येऽन्ये जलस्थलनभौकसः ॥ कुशलाकुशला मिश्राः कर्मणां गतयस्त्वि
माः ॥४०॥ सत्वं रजस्तम इति तिस्रः सुरनृनारकाः ॥ तत्राप्येकैकशो राजन्भिद्यंते गतयस्त्रिधा ।
यदैकतरोऽन्याभ्यां स्वभाव उपहन्यते ॥४१॥ स एवेदं जगद्धाता भगवान्धर्मरूपधृक् ॥ पुष्णा
ति स्थापयन्विश्वं तिर्यङ्नरसुरात्मभिः ॥४२॥

दांतरं मिश्राः मध्यमाः । कर्मणां पुण्यापुण्यमिश्राणां गतयः फलानि ॥४०॥ सत्वादिभेदेन कर्मगतिवैचित्र्यं
प्रपंचयति ॥ सत्वमिति सार्द्धेन ॥ सत्वादयस्तिस्रो गतयः ॥ सुरादिशब्दाः स्थानादीनामुपलक्षणार्थाः ॥ अन्याभ्यां
गुणाभ्यां ॥ स्वभावो गुणः ॥ उपहन्यते अनुविध्यते ॥४१॥ ब्रह्मरूपेण स्रष्टृत्वमुक्त्वा विष्णुरूपेण पाल
कत्वमाह ॥ स एव भगवान्तिर्यगाद्यवतारैरिदं विश्वं स्थापयन्पालयन्धर्मरूपेण पुष्णाति भोगैः संवर्द्धयति ॥४२॥

भा-द्वि॰
५५

वक्ष्यमाणं विस्तारं प्रतिजानीते॥ परिमाणस्थूलं सूक्ष्मं च कल्पस्य लक्षणं॥ इत्यात् एवं रूप इति तद्विग्रहं अवांतरकल्पमवं
तरादिरूपं विभागं च यथावद्विस्तरेण पुरस्तात्तृतीयस्कंधे व्याख्यास्यामि तत्र पाद्मं कल्पं॥ अथो इति कार्त्स्न्येन व्या
ख्यायमाणं शृणु॥४७॥ यदर्थं सप्रश्नादिनिरूपणं तदेव साक्षात् श्रोतुकामः कथांतरं प्रच्छति यदा हेति॥ भुवः संबं
धीनि तीर्थानि॥ यद्वा भुवः क्षेत्राणि चेति॥४८॥ कौषारवेर्मैत्रेयस्य तत्र तत्र च अध्यात्मज्ञानसंश्रितः संवादः॥४९॥
पुनरागतवान्॥ तत्र च निमित्तं ब्रूहि॥५०॥ राज्ञा प्रश्न इति॥ अयमर्थः यत्पप्रच्छ॥ इदमेव राजापि शुकं पप्र

55

परिमाणं च कालस्य कल्पलक्षणविग्रहं॥ यथा पुरस्ताद्व्याख्यास्ये पाद्मं कल्पमथो शृणु॥४७॥ शौनक उवा
च॥ यदाह भगवान्सूत तन्नाभागवतोत्तमः॥ चचार तीर्थानि भुवस्त्यक्त्वा बंधून्सुदुस्त्यजान्॥४८॥ कुत्र
कौषारवेस्तस्य संवादोऽध्यात्मसंश्रितः॥ यद्वा स भगवांस्तस्मै पृष्टस्तत्त्वमुवाच ह॥४९॥ ब्रूहिनस्तदिदं सौ
म्य विदुरस्य विचेष्टितं॥ बंधुत्यागनिमित्तं च तथैवागतवान्पुनः॥५०॥ सूत उवाच॥ राज्ञो परीक्षिता पृष्टो
यदवोचन्महामुनिः॥ तद्वोऽभिधास्ये शृणुत राज्ञः प्रश्नानुसारतः॥५१॥ इति श्रीभागवते महापुराणे द्विती
यस्कंधे अष्टादशसाहस्र्यां संहितायां द्वितीयस्कंधे दशमोऽध्यायः॥१०॥

वान्॥ शुकोपि विदुरमैत्रेयसंवा
दं पुरस्कृत्य ये पूर्वं राज्ञा कृताः प्रश्नाः तदनुसारेण सर्वपुराणार्थमवोचत्॥ तदेवाहं वोऽभिधास्यामि॥ तथैव शृ
णुतेति॥५१॥ इति श्रीभागवते दीपिकायां श्रीधरस्वामिविरचितायां भावार्थदीपिकायां द्वितीयस्कंधे दशमोऽध्या
यः॥१०॥ श्रीमद्भागवतं येन स्वव्रह्ममुखतो मितं ब्रह्मनारदयोः प्रोक्तं तं वंदे गुरुमीश्वरं॥१॥ यत्त्रयं चिंतं विश्वंन
रीनर्ति जगत्त्रयं॥ संतस्तमेव प्रकुर्वंतु यदत्र स्खलितं मम॥२॥ द्वितीयस्कंधसंबंधिपद भावार्थदीपिका॥ उद्दीप्त

राम
५५

56